# चतुःसप्ततितमे स्वतन्त्रतादिवसावसरे रक्तदुर्गस्य प्राचीरात् प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिनः सम्बोधनस्य मूलपाठः

[भाषान्तरं – सर्वश्री-डॉ.श्रुतिकान्तपाण्डेय-सुनीलजोशिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

मम प्रियाः देशवासिनः! स्वतन्त्रतायाः अस्मिन् पावन - पर्वणि सर्वेभ्यः देशवासिभ्यः वर्धापनम् | तथा च भूरि भूरि शुभ - कामनाः | अद्य वयं स्वतन्त्र - भारते यत् श्वसिमः तस्य पृष्ठभूमौ मातुः भारत्याः लक्षशः पुत्रीणां पुत्राणाञ्च त्यागः, बलिदानम्, तथा च मातरं भारतीं स्वतन्त्रां विधातुं विहित - सङ्कल्पं प्रति तेषां समर्पणम् एवास्ति | अद्य एतादृशानां सर्वेषाम् अपि स्वातन्त्र्य - सैनिकानां, स्वतन्त्रता - वीराणां, नर - पुङ्गवानां, वीर - हुतात्मनां च कृते नमन - पर्वावसरः|

अस्मदीयानां सेनानां पराक्रमिणः भटाः, अस्मदीयानि अर्ध – सैनिक - बलानि, अस्माकम् आरक्षि - युवानः, सुरक्षा - बलैः च संयुक्ताः सर्वेऽपि मातुः भारत्याः रक्षायां सततं संलग्नाः भवन्ति, सामान्य - मानवानां सुरक्षायै अनारतं संलग्नाः सन्ति | अद्य तेभ्यः सर्वेभ्यः च हृदयेन सादरं च स्मर्तुं, तेषां महतीनां त्याग-तपस्यानां कृते नमनपर्व अस्ति|

अपरम् एकम् अभिधानम् – श्री-अरविन्दघोषस्य | सः क्रान्ति - दूतत्वेन आरभ्य महतीम् आध्यात्मिक – यात्राम् अकरोत् | अद्य तस्य जन्म - जयन्ती वर्तते | वयं तस्य सङ्कल्पान्, अस्मदीयान् सङ्कल्पान् च पूरयाम, एतदर्थञ्च तस्य अनुग्रहाशिषः विलसन्तुतराम् |

वयं विशिष्टां परिस्थितिं सम्मुखीकुर्मः| अद्य भारतस्य उज्ज्वल – भविष्य - रूपाः लघु – लघु - बालकाः मम समक्षं नोपस्थिताः सन्ति, यतो हि कोराना - संक्रमणेन ते सर्वे अवरोधिताः | कोराना – काल - खण्डेऽस्मिन् लक्षाधिकाः कोराना - योद्धारः, भवन्तु ते चिकित्सकाः, उपचारिकाः, स्वच्छता - कर्मिणो वा रोगि - वाहन - चालकाः, कस्य कस्य नाम परिगणयेयम्, एते एतावत् – दीर्घकाल - पर्यन्तं, येन प्रकारेण 'सेवा परमो धर्मः' – इति मन्त्रं जीवित्वा दर्शितवन्तः, पूर्ण – समर्पण – भाव - पुरस्सरं मातुः भारत्याः सुतान् असेवन्त, एतादृशानां सर्वेषामपि कोरोना - योद्धृणां कृते अहमद्य प्रणतिं निवेदयामि |

कोराना – काल - खण्डेऽस्मिन्, अस्मदीयाः अनेके भगिनी - भ्रातरः कोरोना - सङ्कटेन प्रभाविताः सन्ति। अनेकानि कुटुम्बानि प्रभावितानि। अनेके स्वीय - जीवितानि अपि

प्रणाशितवन्तः । सर्वेभ्यः एतादृग्भ्यः परिवारेभ्यः अहं सम्वेदनां प्रकटयामि... तथा च, कोरोना - सङ्कटं विरुध्य विश्वसिमि यत् त्रिंशदुत्तरैक – शत – कोटि - मितानां देशवासिनाम् अदम्या इच्छा - शक्तिः, सङ्कल्प - शक्तिः चात्रापि अस्मभ्यं विजयं प्रापयिष्यति, वयञ्च नूनं विजयिनो भविष्यामः।

विश्वसिमि यत् विगतेभ्यः कतिपय - दिनेभ्यः अपि वयम् अनन्य - प्रकारेण विविधानि सङ्कटानि प्रतीकुर्मः। जलाप्लावनस्य प्रकोपः, विशेषेण उत्तर - पूर्वीये, पूर्वीये च भारते, दक्षिणीये पश्चिमीये च भारते केषुचित् क्षेत्रेषु, अनेकानि भूस्खलनानि – विविधानि कष्टानि जनैः प्रतीकृतानि। बहवो जनाः निज - जीवितानि अपि प्रणाशितवन्तः। तानि कुटुम्बानि प्रति अपि स्वीयां सम्वेदनां प्रकटयामि... तथा च, राज्य – सर्वकारैः सम्भूय सङ्गमन – पुरस्सरम् – एतादृशि सङ्कट - काले सर्वदा देशः एकीभूय प्रभवतु, सः केन्द्र - सर्वकारः आहोस्वित् राज्य - सर्वकारः, वयं मिलित्वा तत्कालमेव यावतीमपि सहायतां प्रापयितुं शक्नुमः, सफलता - पूर्वकं कुर्मः।

मम प्रियाः देशवासिनः, अस्माकं कृते स्वतन्त्रतायाः पर्वेदं, स्वाधीनतायाः वीरान् पौनःपुनिकं स्मृत्वा नूतन - सङ्कल्पानाम् ऊर्जावसरो भवति। विशेषेण अस्माकं कृते अभिनवां प्रेरणामादाय, नवीनोल्लासं, नवोत्साहञ्च आदाय पर्वेदम् आयाति... तथा चास्मिन् क्रमे तु अस्माकं कृते सङ्कल्पानुष्ठानं बहु आवश्यकसम्, अपि च, अपरेऽपि अनेके शुभावसराः सन्ति यतो हि आगामिनि क्रमे यदा वयं स्वतन्त्रतायाः पर्व आयोजयिष्यामः, तदा स्वाधीनतायाः पञ्च - सप्ततितमे वर्षे प्रवेक्ष्यामः। अयं हि स्वस्मिन् बृहत्तरोऽवसरः, अत एव, अद्य, भावि - वर्ष-द्वयस्य कृते बृहत्तमान् सङ्कल्पान् स्वीकृत्य अस्माभिः प्रस्थातव्यम् – त्रिंशदुत्तरैक – शत – कोटि - मितैः देशवासिभिः चलनीयम् । स्वाधीनतायाः पञ्च – सप्तति - तमे वर्षे यदा प्रवेक्ष्यामः तथा च, स्वाधीनतायाः पञ्च – सप्तति - वर्षाणि यदा पूर्णताङ्गमिष्यन्ति, वयम् अस्मदीयानां सङ्कल्पानां पूर्तिं महा - पर्वरूपेण अपि आयोजयिष्यामः।

मम प्रियाः देशवासिनः, अस्मदीयैः पूर्वजैः अखण्डाम्, एकनिष्ठां च तपस्यामनुष्ठाय, त्याग - बलिदानयोः उच्चभावनाः प्रतिष्ठाप्य च, अस्मभ्यं येन प्रकारेण स्वतन्त्रता प्रापिता, ते सर्वमपि समर्पितवन्तः... परञ्च अस्माभिः न कदाचिदपि विस्मर्तव्यमिदं यत् पराधीनतायाः एतावति दीर्घे कालखण्डे कश्चन अपि एतादृशः क्षणः नासीत्, किञ्चिदपि एतादृशं क्षेत्रं नासीत् यदा स्वतन्त्रताम् अवाप्तुम् उत्कटेच्छा नोत्त्थिता जाता ।

स्वतन्त्रतायाः प्राप्त्यर्थं किं केनापि नैव प्रयतितं स्यात्, युद्धं न कृतं भवेत्, त्यागः नैव आचरितः स्याद्... तथा च, एकतः ते स्वीयं यौवनं कारासु यापितवन्तः, जीवनस्य सर्वाण्यपि स्वप्नानि च कण्ठपाशं चुम्बित्वा समर्पितवन्तः । एतेभ्यः वीरेभ्यः नमान्सि अर्पयन्तः वयम् अद्भुतम् अनुभवामः ... एकतः सशस्त्रक्रान्तेः कालः, अपरतश्च जनान्दोलनस्य प्रवर्तनम् ... पूज्य - बापूवर्यस्य नेतृत्वे राष्ट्र - जागरणेन साकं जनान्दोलनस्य अन्यतम - धारया स्वातन्त्र्यान्दोलनाय नवीनोर्जा प्रदत्ता, एवं हि वयमद्य स्वाधीनतायाः पर्व आमन्तुं शक्नुमः।

स्वाधीनतायाः अस्मिन् सङ्घर्षे भारतस्य आत्मानं चूर्णयितुम् अनारतं प्रयासाः विहिताः ... अपरिगणिताः प्रयासाः सञ्जाताः। भारतं स्वीयेभ्यः संस्कृति – परम्परा – रीति - देशाचारेभ्यः उच्छेत्तुं किं किं नापादितम् ? तत् काल – खण्डमासीत् – नैक - शताब्दानां काल - खण्डम् । साम – दाम – दण्ड - भेदेति सर्वमपि स्वीय - चरम – कोट्यामासीत् ... तथा च, केचन जनाः तु एवं मत्वा व्यवहरन्ति स्म यत् वयन्तु 'यावत् चन्द्र-दिवाकरौ' अत्र शास्तुम् आगताः स्मः। परञ्च स्वतन्त्रतायाः उत्कटेच्छया तेषां सर्वाः अपि कल्पनाः प्रणाशिताः। ते विचारयन्ति स्म यत् एतावान् विशालः देशः, अनेकानि लघु - राज्यानि, नाना भाषित - भाषाः, पृथक् परिधानानि, भोजनापानकानि भिन्नानि, अनेकाश्च भाषाः, एताभिः विविधताभिः विकीर्णोऽयं देशः कदाचिदपि एकीभूय स्वाधीनतायाः सङ्घर्षं कर्तुं नैव पारयति । परञ्च ते अस्य देशस्य प्राणशक्तिम् अभिज्ञातुं नैव अपारयन् ... अन्तर्भूता या प्राणशक्तिरस्ति ... एकं सातत्यम् – एकं सूत्रं येन वयं सर्वे बद्धाः स्मः, तेन स्वाधीनतायाः तस्मिन् पर्वणि पूर्ण - शक्त्या यदा रङ्गभूमौ पदार्पणं कृतं तदा देशोऽयं स्वाधीनतायाः युद्धे विजयश्रियम् अवाप्नोत् ।

वयं इदमपि जानीमः यत् तत् काल – खण्डमासीत् - विस्तारवादस्य, विचारवन्तः जनाः जगति यत्रापि प्रसरितुम् अपारयन्, तदर्थं तैः प्रयतितं ... स्वीयान् ध्वजान् उत्तोलयितुं तैः प्रयतितम् । परञ्च भारतस्य स्वाधीनतायाः आन्दोलनमपि जगति प्रेरणा - पुञ्जत्वेन प्रावर्तत ... दिव्य - स्तम्भत्वेन सिद्धम्, तथा च, जगति अपि स्वाधीनतायाः उत्कटेच्छा जागरिता। ये नाम विस्तारवादस्य अन्धानुधावने संलग्नाः आसन्, स्वीयान् ध्वजान् उत्तोलयितुं व्यापृताः आसन्, ते स्वीयां विस्तारवाद - महत्त्वाकाङ्क्षां पूरयितुम् अशेष - विश्वं महा - विश्वयुद्ध - द्वये निक्षिप्तवन्तः ... मानवतां विक्षिप्तवन्तः, जीवितानि प्रणाशितवन्तः, संसारं च उत्सृष्टवन्तः। परञ्च एतादृशेऽपि काल - खण्डे, युद्धस्य विभीषिकायाः मध्येऽपि, भारतेन स्वीय - स्वाधीनतायाः उत्कटेच्छा नैव त्यक्ता ... न कदाचिदपि आनम्यता स्वीकृता, न चापि ऋजुता अङ्गीकृता ।

देशोऽयं ... सत्यावश्यके अनारतं बलिदानमकरोत् ... कष्टोपागमस्य सत्याम् आवश्यकतायां, सततम् अमुना कष्टानि सोढानि, जनान्दोलनस्य प्रवर्तनस्य सत्याम् अपेक्षायाञ्च, सततं जनान्दोलनं प्रवर्तितम् । तथा च, भारतस्य अमुना सङ्घर्षेण जगति स्वतन्त्रतायाः कृते अनुकूलः परिवेशः विरचितः ... एवं हि भारतस्य शक्त्या जगति यत् परिवर्तनं सम्वृत्तम्, विस्तारवादस्य कृते समाह्वानं सञ्जातं भारतम् – इतिहासः वृत्तमिदं कदाचिदपि न्यक्कर्तुं नैव पारयति।

मम प्रियाः देशवासिनः, स्वतन्त्रतायाः युद्धे, अशेष - जगति देशोऽयं सङ्घ - शक्तिं, स्वीय-सामूहिकतायाः सत्वं, निजोज्ज्वल - भविष्यत् प्रति स्व – प्रेरणा - सङ्कल्प – समर्पण - भावानां च ऊर्जामादाय अनारतम् अग्रेसरन् प्रावर्तत।

मम प्रियाः देशवासिनः, 'कोरोना' - इति वैश्विक - महामार्याः अवसरे त्रिंशदुत्तरैक - शत – कोटि - मिताः भारतीयाः सङ्कल्पितवन्तः – सङ्कल्पोऽयम् आत्म - निर्भरत्वस्य ... तथा च आत्म - निर्भरं भारतमद्य प्रत्येकमपि हिन्दुस्थानीयस्य मनसि अध्यास्ते । आत्म - निर्भरं भारतम् ! – स्वप्नमिदं सङ्कल्पत्वेन परिवर्तितमिति पश्यामः। आत्म - निर्भरं भारतम् – नैतत् केवलं शब्दरूपम्, अयन्तु साम्प्रतं त्रिंशदुत्तरैक – शत – कोटि - मितानां देशवासिनां कृते मन्त्ररूपं वर्तते।

वयं जानीमः ... यदाहम् आत्म - निर्भरस्य वृत्तं कथयामि, अस्मासु येऽपि पञ्चविंश – त्रिंशत् - वर्षायुस्तः अधिकाः अभविष्यन्, ते सर्वेऽपि निज - कुटुम्बे स्व - पितृभ्याम् आहोस्वित् वरिष्ठेभ्यः श्रुतवन्तः स्युः यत् भ्रात! पुत्री पुत्रश्च साम्प्रतं विंश – एकविंश - वर्षीयौ जातौ, अधुना आत्मनिर्भरौ स्याताम् । विंश – एकविंश - वर्षेषु अपि कुटुम्बं सन्ततिभ्यः आत्मनिर्भरं भवितुम् अपेक्षते । वयन्तु स्वाधीनतायाः पञ्च – सप्तति - वर्षेभ्यः पदमेकमेव दूरे स्मः, तर्हि अस्माकं कृतेऽपि ... भारत – सदृश - देशस्य कृतेऽपि आत्म - निर्भरत्वावाप्तिः अनिवार्यास्ति। यत्किमपि कुटुम्बार्थम् आवश्यकम्, तत् देशार्थमपि आवश्यकम् ... तथा च दृढं विश्वसिमि यत् भारतं स्वप्नमेतं नूनं चरितार्थं करिष्यति ... अपि च, अस्य कारणमस्ति यन्मम देशस्य नागरिकाणां सामर्थ्ये विश्वसिमि, अहं मदीय - देशस्य प्रतिभाम् आधृत्य गर्वम् अनुभवामि, अस्य देशस्य युव - जनेषु, देशस्य मातृशक्तौ – अस्माकं महिलासु यत् अप्रतिमं सामर्थ्यं वर्तते ... तस्मिन्नहं दृढं विश्वसिमि । मदीय - हिन्दुस्थानस्य चिन्तनम्, हिन्दुस्थानस्य अभिगमः, अस्मिन् च विश्वसिमि ... इतिहासः साक्षी अस्ति यत् भारतम् यदि वारैकं

निश्चिनोति, तदा भारतं कृत्वैव विरमते। तथा च, अस्मादेव कारणात् यदा वयम् आत्म - निर्भरत्वस्य वृत्तं कथयामः तदा जगदिदम् समुत्सुकमपि, भारतात् अपेक्षते अपि ... अत एव ताम् अपेक्षां पूरयितुं आत्मानं तद्योग्यं विधातुञ्च अस्मदीयं प्रयासानुष्ठानं परमावश्यकम् । नूनं अस्माभिः सन्नद्धैः भाव्यम्।

भारतस्य चिन्तने ... भारतसदृशो विशालोऽयं देशः, भारतस्य युव - शक्त्या सम्भरितोऽयं देशः । आत्म – निर्भर - भारतस्य प्रथमः समयः भवति - आत्म - विश्वासेन सम्भरितं भारतम् ... तस्यायमेव आधार - शिला भवति ... अयमेव च विकासाय नूतनां गतिम्, अभिनवाञ्च ऊर्जां प्रदातुं सामर्थ्यं संधत्ते ।

भारतं 'विश्वमेकं कुटुम्बम्' - इति संस्कारैः पोषितं सम्वर्धितञ्च । वेदाः निगदन्ति - 'वसुधैव कुटुम्बकम्' , तर्हि विनोबाजी कथयति स्म - 'जय जगत्' ... अत एव अस्माकं कृते विश्वमेकः परिवारोऽस्ति । अत एव ... आर्थिक - विकासोऽपि भवेत्, युगपदेव मानवस्य मानवतायाः चापि केन्द्र - स्थानं भवितव्यम्, अस्य महत्वमपि स्यात्, एतदेव निध्याय वयम् अग्रेसरामः।

सम्प्रति संसारोऽयम् अन्तःसम्बद्धः, अद्यत्वे जगदिदं अन्तःनिर्भरञ्च, अत एव कालोऽपेक्षते यत् विश्वार्थ - व्यवस्थायां भारत - सदृशस्य विशालदेशस्य योगदानम् एधितव्यम् । विश्व - कल्याणाय अपि भारतस्येदं कर्तव्यम्। भारतं नैजं योगदानं वर्धयितुं समीहते चेत् तदा भारतेन स्वयं शक्तेन भाव्यम्, भारतेन नूनम् आत्मनिर्भरेण भावनीयम्। वयं जगत् - कल्याणार्थमपि आत्मानं सामर्थ्यवन्तं कर्तुं नूनं प्रयतेम। यदास्माकं मूलानि सुदृढानि भविष्यन्ति, अस्मदीयं नैजं सामर्थ्यञ्च भविष्यति तदा वयं संसारस्यापि कल्याण-दिशि पदमुत्क्षेप्तुं शक्नुमः।

अस्मदीये देशे असीमिता प्राकृतिक - सम्पदास्ति, किं किञ्च नास्ति? अद्यत्वे कालोऽपेक्षते यद् वयं एतैः प्राकृतिक - संसाधनैः मूल्यं संयोजयेम, वयं स्वीयायां मानव - सम्पदायां मूल्यवृद्धिं करवाम, नवीनाम् उच्छ्रिततां प्रति सन्नयेम । कदा - पर्यन्तं वयं देशात् अपरिष्कृतां सामग्रीं विदेशेभ्यः प्रेषयिष्यन्तः भविष्यामः ... तथा चावलोकयन्तु ननु ... जगते अपरिष्कृत - सामग्र्याः प्रेषणम्, तथा च निष्पन्न - वस्तूनां ततः परावर्तनं, इदं क्रीडा - कौतुकं कदा पर्यन्तं प्रचलिता । ... अत एव अस्माभिः आत्म - निर्भरैः भाव्यम् । अस्मदीयायां प्रत्येकमपि शक्तौ वैश्विकावश्यकतानाम् – अनुसारं मूल्य - वृद्धिः करणीयास्ति। इदमस्ति

अस्मदीयं दायित्यम् । मूल्य – संयोजन - दिशि वयम् अग्रे सर्तुम् अभिलषामः, वयं जगति योगदानानुष्ठानार्थम् अग्रेसर्तुम् अभिलषामः।

तथैव कृषिक्षेत्रेऽपि ... एतादृशः कालः आसीत् यदा वयं बहिस्तः गोधूमान् आदाय निजोदर - पूर्तिं कुर्वन्तः आस्म । परञ्च अस्मदीय - देशस्य कृषकाः तत् अद्भुतं कृत्वा प्रादर्शयन् यत् कृषि - क्षेत्रेऽद्य भारतम् आत्म - निर्भरं सञ्जातम्। साम्प्रतं भारतस्य कृषकाः भारतीय - नागरिकाणाम् उदरपूर्तिं कुर्वन्ति ... एतावदेव नैव, साम्प्रतं भारतं तस्यां स्थितौ वर्तते यत् जगति यः कश्चन अपि अपेक्षते तस्मै अपि वयम् अन्नानि दातुं शक्नुमः। यदीयम् अस्ति अस्मदीया शक्तिः, आत्म - निर्भरत्वस्य एषास्ति शक्तिः ... तदा अस्मदीये कृषि - क्षेत्रेऽपि मूल्य - वृद्धिः आवश्यकी । वैश्विकावश्यकतानाम् अनुसारं अस्मदीये कृषि - जगति परिवर्तनस्य आवश्यकता अस्ति । विश्वस्य अपेक्षाः पूरयितुम् अस्माभिः नैजं कृषि - जगदपि अग्रे सारयितुम् आवश्यकम्।

अद्य देशः बहूनि नूतनानि पदानि उत्त्थापयति, अत एव सम्प्रति भवन्तः पश्यन्तु, अन्तरिक्ष - क्षेत्रमपि अस्माभिः उद्घाटितम्। देशस्य युवानः अवसरान् प्राप्नुवन् । कृषिक्षेत्रम् अस्माभिः वैधिक - बन्धनेभ्यः विमोचितम् । वयं आत्म - निर्भरं भवितुं प्रायतामहि। यदा भारतम् अन्तरिक्ष - क्षेत्रे शक्तिमत्तरं भवति तदा प्रतिवेशिनः अवश्यमेव तेन लाभान्विताः भवन्ति । यदा भवन्तः ऊर्जा - क्षेत्रे शक्तिमत्तराः भवन्ति तदा यः कश्चन देशः स्वीयान्धकारं निरस्तुं समीहते, भारतं तस्मै साहाय्यं प्रदातुं शक्नोति । यदा देशस्य आरोग्य - क्षेत्रस्य आधार - स्वरूपम् आत्म - निर्भरं जायते तदा विश्वस्य अनेकेषां देशानां कृते पर्यटनाय आरोग्याय च भारतम् ईप्सितम् अग्रस्थानं भवति । भारतं तेषां रुचिकरं देशं भवितुं शक्नोति। अत एव आवश्यकं यत् भारते समुत्पादि- तायाः सामग्र्याः प्रशंसा अशेष - जगति कीदृशी भवेदिति। पूर्वं तादृशः समयः आसीत्, अस्मदीये देशे यानि वस्तूनि निर्मीयन्ते स्म, अस्माकं दक्ष – मानव - शक्त्या यत् कार्यं विधीयते स्म, तद्धि विश्वस्मिन् विश्वे अतितराम् अभिनन्द्यते स्म ... इतिहासः साक्षी वर्तते ।

यदा वयम् आत्म - निर्भरत्वं चर्चामः तदा केवलम् आयातस्य अल्पीकरणम् एव अस्माकं विचार - सरण्यां नैवास्ति। यदा आत्म - निर्भरत्वं कथयामः तदा अस्मदीयं यत् कौशलम् अस्ति, अस्माकं यत् मानव - संसाधनस्य सामर्थ्यम् अस्ति ... यदा वस्तूनि बहिस्तः

आयान्ति, तदा तेषां तत् सामर्थ्यं प्रणष्टुम् आरभते। वंशानुवंशं तत् प्रणश्यति । अस्माभिः स्वीयं तत् सामर्थ्यं संरक्षणीयम् ... सम्वर्धनीयम् अपि । कौशलं विवर्धनीयम्, रचनात्मकता सम्वर्धनीया अस्ति ... एतच्च सन्नीय अस्माभिः सततम् अग्रे सर्तव्यम्। अस्माभिः कौशल - विकासस्य दिशि विशेषं बलं प्रदेयम् - आत्म - निर्भराय भारताय, अस्माकं सामर्थ्य -विवर्धनाय।

मम प्रियाः देशवासिनः, जानाम्यहं यत् आत्म - निर्भरस्य वृत्तं यदाहं वदामि तदा, अनेक - विधाः आशङ्काः अपि प्रकटीक्रियन्ते । तथ्यमिदं स्वीकरोमि यत् आत्म – निर्भर - भारतस्य कृते लक्षशः समाह्वानानि सन्ति, तथा च यदा विश्वं स्पर्धायाः अवस्थायां स्यात् तदा समाह्वानानि सम्वर्धयन्ति अपि। परञ्च देशस्य समक्षं लक्षशः समाह्वानानि सन्ति चेत् तदा, देशस्य पार्श्वे कोटिशः समाधान - प्रदायिनी शक्तिरपि वर्तते ... मदीयाः देशवासिनः अपि सन्ति ये समाधानस्य सामर्थ्यं सन्धारयन्ति।

भवन्तः अवलोकयन्तु, कोरोना - संक्रमणस्य सङ्कट - काले अस्माभिः दृष्टं यत् बहूनां वस्तूनां कृते वयं काठिन्यानि अनुभवामः ... संसारात् वयम् आदातुम् अभिलषामः, जगद् दातुं नैव पारयति। अस्मदीयस्य देशस्य नवयुवानः, अस्माकीनस्य देशस्य उद्यमिनः, अस्माकं देशस्य उद्योग - जगतः जनाः उद्यताः जाताः। यस्मिन् देशे 'N-95'- इति मुखावरणानि नैव निर्मीयन्ते स्म, तेषां निर्माणम् आरब्धम्, 'पीपीई' - 'Personal Protective Equipment' – इति वैयक्तिक-संरक्षणोपकरणानि नैव उत्पाद्यन्ते स्म, तेषाम् उत्पादनम् आरभत, वात - यन्त्राणि नैव निर्मीयन्ते स्म, तेषामपि उत्पादनम् आरब्धम् । देशस्य आवश्यकतास्तु पूरिताः, परञ्च जगति निर्यात - करणस्य अस्मदीया शक्तिः सञ्जाता। जगतः आवश्यकता आसीत्। आत्म - निर्भरं भारतं जगत् केन प्रकारेण उपकर्तुं शक्नोति ... साम्प्रतं वयं एतद् द्रष्टुं शक्नुमः। अत एव च, विश्वस्य कल्याणे अपि भारतस्य योगदानस्य दायित्वं भवत्येव।

बहु सम्वृत्तम् ... स्वतन्त्र - भारतस्य मानसिकता कीदृशी स्यात् ? स्वतन्त्र - भारतस्य मानसिकता भवेत् - Vocal For Local ... स्थानीयोत्पादानां मुखर - प्रचारः। अस्मदीयाः ये स्थानीयोत्पादाः सन्ति तेषां गौरव - गानम् अस्माभिः नूनं करणीयम् । यदि वयं स्वीयोत्पादानां गौरव - गानं नैव करिष्यामः चेत् तदा, तेषां प्रोन्नतीकरणस्य अवसरः अपि नैव प्राप्स्यते ... तेषां धैर्यम् अपि नैव विवर्धिष्यते। आगच्छन्तु, वयं मिलित्वा सङ्कल्पयाम,

स्वाधीनतायाः पञ्च – सप्ततितम - वर्षाणां पर्व प्रति यदा वयं पदक्षेपं कुर्मः, तदा Vocal For Local - इत्यस्य जीवन - मन्त्रत्वेन भवाम, सम्भूय च भारतस्य तां शक्तिं विवर्धयेम ।

मम प्रियाः देशवासिनः, अस्मदीयोऽयं देशः कृदृन्शि आश्चर्य - कराणि कार्याणि करोति ? केन प्रकारेण चाग्रेसरति ? वृत्तमिदं वयं सम्यक्तया अवगन्तुं शक्नुमः। को नाम कल्पयितुं शक्नोति स्म यत् कदाचित् निर्धनानां जन – धन - लेखासु लक्षशः कोटिशो वा रूप्यकाणि निर्बाधं अन्तरयिष्यन्ते ? को नाम कल्पयितुं शक्नोति स्म यत् कृषकाणां हितार्थं A P M C - इति Agricultural Produce Marketing Committee - सदृशे अधिनियमे ... एतावन्ति परिवर्तनानि भविष्यन्ति ? को नाम कल्पयितुं शक्नोति स्म यत् अस्मदीयेषु व्यापारिषु यः ‘essential commodity Act’ - इति आवश्यक - वस्त्वधिनियमः उल्लम्बमानं खड्गमिव आसीत् ... एतावतां वर्षाणाम् अन्तरालानन्तरं सः अपि परिवर्तयिष्यते ? को नाम विचारयितुं शक्नोति स्म यत् अस्माकम् अन्तरिक्ष - क्षेत्रम् अस्मदीय - देशस्य यूनां कृते उद्घाटयिष्यते । अद्य वयम् अवलोकयन्तः स्मः – राष्ट्रिय – शिक्षा - नीतिः भवतु, One Nation -One Ration Card - इति ‘एकं राष्ट्रम् एकं सम्विभक्त - पत्रम्’ - इत्यस्य वृत्तं भवेत्, ‘One Nation - One Grid’ ‘One Nation - One Tax’ - इत्यनयोः वा वृत्तं स्यात्, Insolvency - इति ‘असमर्थम् ऋणशोधनम्’, ‘bankruptcy code’ – इति ‘नष्ट – निधिता - सङ्केतः’ - चेत्यस्य वा वृत्तं भवेत्, आहोस्वित् बैंकानां विलयीकरणस्य प्रयासः स्यात् ... देशस्य सत्यत्वं सञ्जातमस्ति, देशस्य यथार्थत्वं भजते।

भारते परिवर्तनस्य काल - खण्डेऽस्मिन् परिष्काराणां परिणामान् जगदिदं पश्यत् अस्ति। एकैकं ... मिथश्च सम्भूय वयं यत्किमपि परिष्कुर्वन्तः स्मः, तत् जगदिदं सूक्ष्मेक्षिकया पश्यत् अस्ति । तस्यैव कारणमस्ति यत् विगते वर्षे भारते F D I - इति वैदेशिक – साक्षात् - विनिवेशेन अधुना - पर्यन्तं प्रतिष्ठापितानि सर्वाण्यपि आलेख्य -कीर्तिमानानि अतिक्रान्तानि।

विगते वर्षे भारते वैदेशिक – साक्षात् - विनिवेशे प्रतिशतम् अष्टादश - मिता वृद्धिः सम्वृत्ता ... सम्वृद्धिः अभवत् । अत एव कोरोना - कालेऽपि विश्वस्य बृहन्तः समवायाः भारतं प्रति उन्मुखीभवन्तः सन्ति । विश्वासोऽयम् एवमेव नोत्पन्नोऽस्ति, विनैव प्रयत्नेन जगत् मोहितं नैव जातम् । एतदर्थं भारतं स्वीयाः नीतीः, नैजं लोकतन्त्रं, अर्थव्यवस्थायाः आधार - शिलायाः स्वीयाञ्च दृढताम् अभिलक्ष्य यानि कार्याणि अकरोत्, तैः विश्वासोऽयं जागरितोऽस्ति।

अशेष - विश्वस्य अनेके व्यवसायाः भारतम् आपूर्ति - शृङ्खलायाः केन्द्र - रूपेण अद्य अवलोकयन्ति। इतः परम् अस्माभिः 'Make in India' - इत्यनेन साकं 'Make for World' - इति मन्त्रमादाय अपि अग्रे सर्तव्यम् ।

त्रिंशदुत्तरैक – शत - कोटि - मितानां देशवासिनाम् सामर्थ्यम् ... ननु स्मरन्तु, व्यतीतानि कानिचिद् दिनानि... तथा च, त्रिंशदुत्तरैक – शत - कोटि - मितानां देशवासिनाम् सामर्थ्याय गर्वम् अनुभवन्तु । यदा युगपदेव, कोरोना - संक्रमणस्य महाकाल - खण्डेऽस्मिन् एकतः चक्रवातः, पूर्वदिशि अपि चक्रवातः, पश्चिम - क्षेत्रेऽपि चक्रवातः, विद्युत्पातेन बहूनां मृत्यु - वार्ताः, कुत्रचित् भूयोभूयः भूस्खलन - घटनाः, अल्पानां बृहताञ्च भूकम्पानाम् आघाताः ... एतावत् अल्पतरमासीत् इति कृत्वा अस्माकं कृषकेषु शलभ - दलानाम् आपदाः समापन्नाः। न जानीमहे – युगपदेव एकानुक्रमं काठिन्य - कोपः अनारतं व्रातीभूतः । परञ्च एवं सत्यपि देशेन न मनाग् अपि स्वीयः विश्वासः प्रणाशितः । देशोऽयम् आत्म - विश्वासेन साकमेव अग्रेसरन् आसीत्।

देशवासिनां जीवनानि, देशस्य अर्थव्यवस्थाञ्च कोरोना - प्रभावात् शीघ्रातिशीघ्रं बहिः निष्कासयितुम् अद्य अस्मदीया प्राथमिकता वर्तते । एतदर्थं महत्त्वाधायिनी भूमिका भविष्यति – 'National Infrastructure Pipeline Project' इति राष्ट्रियाधार – स्वरूप – प्रणालिका - योजनायाः' । एतदर्थं दशाधिक – शतलक्ष – कोटि – रूप्यकाधिक - राशिः व्ययीकरिष्यते । एतदर्थं पृथक् - पृथक् क्षेत्रे प्रायेण सप्त - सहस्रं योजनाः अभिज्ञाताः सन्ति । अमुना देशस्य 'Overall Infrastructure Development' - इति समग्राधार – स्वरूप - विकासः नूतन - दिगुन्मुखः भविता, अन्यतरा नवीना गतिरपि प्राप्स्यते ... अत एव सर्वदैव निगद्यते यत् एतादृशे सङ्कट - काले यावदधिकतरम् आधार - स्वरूपाय बलं प्रदीयेत तद्वरम्, येन आर्थिक - कार्याणि वर्धन्ते, जनाः वृत्तिताम् अवाप्नुवन्ति, कार्याणि लभन्ते ... तेन सम्बद्धानि अनेकानि कार्याणि युगपदेव प्रचलन्ति । अल्पाः बृहत्तराश्च उद्योगाः, कृषकाः, प्रत्येकमपि मध्यमवर्गः इति सर्वेऽपि अतितरां लाभान् अवाप्नुवन्ति।

अद्याहं वृत्तमेकं स्मर्तुम् अभिलषामि ... यदा अटल – बिहारि – वाजपेयि - महोदयः अस्माकं देशस्य प्रधानमन्त्री आसीत् तदा सः 'स्वर्णिम - चतुर्भुज' स्य बृहतीमेकां, दूरगामि - प्रभावशालिनीं च योजनाम् आरभत। देशस्य मार्ग - जालस्य आधार - स्वरूपं भावि - वंशं यावत्

सन्नीतवान्। अद्यापि तं 'स्वर्णिम - चतुर्भुजं' प्रति देशः सुबहु - गर्वेण पश्यन्नस्ति यन् - नूनम् अस्मदीयं हिन्दुस्थानं परिवर्तते, अवलोकयति च।

मम प्रियाः देशवासिनः, अटल - महोदयः स्वीयावधौ कार्यमिदम् अकरोत् परञ्च इतः परम् अस्माभिः एतद् अग्रे सन्नेतव्यमस्ति। एतन्नूतन - दिगुन्मुखि करणीयम्, तथा चेतः परं भूम्यन्तः - भण्डारणेन नैवास्ति अलम् । आधार – स्वरूपं मार्गार्थं, मार्ग-विभागीयः कार्यं करिष्यति, रेलविभागस्य कृते तद्विभागीयः निभालयि - ष्यतीति ... न रेल - कार्यस्य मार्गेण सह कश्चन सम्बन्धः, न मार्गस्य च रेल - विभागेन कश्चिदपि सम्बन्धः ... न च विमान - पत्तनस्य नौ - पत्तनेन साकं संयुतिः, न वा नौ - पत्तनस्य विमान – पत्तनैः सह सम्बन्धः ... न वा रेलास्थानकस्य बस - वाहनैः सम्पृक्तिः, न च बसास्थानकस्य रेलास्थानकैः कश्चन सम्बन्धः – एतादृशी स्थितिः नैव अपेक्ष्यते। साम्प्रतम् अस्मदीयं समग्रमपि आधार - स्वरूपं व्यापकं, समन्वितञ्च भवेत्, मिथः पूरकञ्च स्यात् – रेलकार्यैः साकं मार्गः पूरकः भवेत्, मार्गेण सह नौ - पत्तनं पूरकं स्यात्, नौ - पत्तनेन सार्धं पत्तनं पूरकं भवेत् ... एतच्च नूतन - शताब्दस्य कृते, वयं 'multi model connectivity Infrastructure' इति बहवायाम – सम्पृक्ति - आधारस्वरूपं संयोजयितुम् अधुना अग्रेसरामः। अभिनवोऽयम् आयामः भविता, महत् -स्वप्नं समाकलय्य विषयेऽस्मिन् कार्यम् आरब्धमस्ति। दृढं विश्वसिमि यत् भूम्यन्तः - भण्डारणं परिसमाप्य वयं, अस्यै समग्रायै व्यवस्थायै नवाम् ऊर्जां प्रदास्यामः।

अमुना सहैव अस्मदीयानि समुद्र - तटानि ...! विश्व - व्यापारार्थं समुद्र - तटानां स्वीयं विशिष्टं महत्वं भवति। यदा वयं पत्तन – सन्नीत - विकासम् अभिलक्ष्य प्रचलामः, तदा भावि - दिनेषु, समुद्र - तटानां कृत्स्नेऽपि क्षेत्रे चतुः – उपपथ - समन्वितं मार्गं विनिर्मातुं तस्यां दिशि आधुनिकाधार - स्वरूपस्य निर्माणार्थं वयं कार्याणि करिष्यामः।

मम प्रियाः देशवासिनः, अस्मदीयेषु शास्त्रेषु बहु महत्वपूर्णं तथ्यं प्रोक्तमस्ति। अस्माकं शास्त्रेषु निगदितं यत् – 'सामर्थ्यमूलं स्वातन्त्र्यं, श्रममूलं च वैभवम्' - अर्थात् कस्यापि समाजस्य, कस्यापि च राष्ट्रस्य स्वातन्त्र्यस्य स्रोतः तस्य सामर्थ्यं भवति ... तथा च तस्य वैभवस्य, उन्नतेः, प्रगतेश्च स्रोतः तस्य श्रमशक्तिरस्ति। अत एव, सामान्य - नागरिकस्य – पौरः वा ग्रामीणः – तस्य श्रमस्य काचिदपि स्पर्धा नास्ति । श्रमशीलः समाजः यदा सौविध्यानि प्राप्नोति, जीवनस्य सङ्घर्षः, दैनन्दिनानि काठिन्यानि च अल्पीभवन्ति, तदा तस्य ऊर्जा, तस्य

शक्तिः सुबहु विकसति ... विचित्राश्चर्याणि नूनं करोति। व्यतीते वर्ष - षट्के देशस्य श्रम-शीलानां नागरिकाणां जीवनं भद्रतरं विधातुम् अनेकानि अभियानानि प्रवर्तितानि। भवन्तः पश्यन्तु, बैंक - लेखा भवतु, पक्व - गृहाणां वृत्तम् अस्तु, एतावत् – बृहन् - मात्रिकञ्च शौचालय - निर्माणं वा भवतु, प्रत्येकमपि गृहे विद्युत् - सम्पृक्तेः प्रापणं वा स्यात्, मातृ - भगिनीः च धूम्र – मुक्ताः कर्तुं वाति – सम्पर्क - संयोजनं वा भवेत्, निर्धनतमेभ्यः जीवनागोपस्य सुरक्षा - प्रदानस्य प्रयासः वा भवेत्, पञ्च –लक्ष - रूप्यकाणि यावत् उत्तमे चिकित्सालये निःशुल्कं समुपचार - हेतोः 'आयुष्मान् भारत - योजना' वा स्यात्, सम्विभक्त - अन्नप्रदायिनः आपणान् प्रविधिना सह संयोजनस्य वा वृत्तं भवेत् – प्रत्येकमपि निर्धनाय, प्रत्येकमपि जनाय, विनैव केनापि भेद - भावेन, पूर्ण - पारदर्शितया साकं च तस्मै लाभ - प्रापणे व्यतीते वर्ष - षट्के बहु सम्यक्तया प्रगतिः विहितास्ति।

कोरोना - सङ्कटेऽपि एताभिः व्यवस्थाभिः बहु साहाय्यम् अवाप्तम्। अस्मिन्नवधौ कोटिशः निर्धन - परिवारेभ्यः निःशुल्कं वाति - भाण्डानां प्रापणं. .. संविभक्त - पत्रं वा न वा, अशीति - कोट्यधिकानां मदीयानां देशवासिनां गृहेषु चूल्लिका-ज्वालनं प्रवर्तेत ... अशीति - कोट्यधिकानां देशवासिनां कृते निःशुल्कम् अन्न - प्रापणस्य वा कार्यं स्यात्, नवति – सहस्र – कोटि – रूप्यकाधिक - राशेः साक्षात् बैंक - खातासु अन्तरणं वा भवेत् – कतिपयेभ्यः वर्षेभ्यः प्राक् तु न कश्चन एवं विचारयितुं प्रभवति स्म, कल्पयितुं नैव शक्यते स्म यत् दिल्लीतः रूप्यकं निःसरेत्, तथा च शतमेव पणकानि निर्धनस्य लेखायां संयोजितानि भवेयुः, इदन्तु न कदाचित् पूर्वं कल्प्यते स्म।

स्वीये एव ग्रामे वृत्तितायै निर्धन - कल्याण - वृत्तिताभियानम् आरब्धम् । श्रमिक - सखायः आत्मानं पुनः कौशल - सम्पन्नान्, प्रोन्नत - कौशलान्वितान् च कुर्युः – इदं विश्वसन्तः, श्रम - शक्तौ विश्वासम् आपादयन्तः, ग्रामाणां संसाधनेषु विश्वसन्तः, 'vocal for local' इति सूत्रं सबलम् अनुपालयन्तः, कौशल-सम्पन्नतया, प्रोन्नत-कौशलेन च निज - देशस्य श्रम - शक्तेः, अस्मदीयानाञ्च निर्धनानां क्षमीकरणस्य दिशायां वयं कार्याणि कुर्मः।

नगरेषु अस्मदीयाः ये श्रमिकाः सन्ति – यतो हि आर्थिक -कार्याणां केन्द्राणि तु नगराणि एव सन्ति – ग्रामेभ्यः ... दूरं सुदूरात् जनाः नगराणि आयान्ति, वीथ्यापणिकाः स्युः, उपमार्गीयाः लघ्वापणिकाः वा भवेयुः, अद्यत्वे बैंकेभ्यः साक्षात् तेभ्यः धन-प्रदान-विषयिणी

योजना प्रवर्तते। लक्षशो जनाः एतावति अल्पे काले – कोरोना – कालखण्डे अस्याः लाभान् अवाप्नुवन् । इतः परं कुतश्चित् अपि अधिकतर - कुसीदाधारेण धनाहरणस्य आवश्यकता नैव भविष्यति। बैंकात् ते साधिकारं स्वीयं धनम् आहर्तुं शक्ष्यन्ति।

तादृक् - प्रकारेण यदा नगरेषु अस्मदीयाः श्रमिकाः आयान्ति, तदा यदि ते आवासार्थं समुचित - सौविध्यानि अवाप्नुवन्ति चेत्तर्हि तेषां कार्यक्षमतायाम् अपि भूयसी वृद्धिः भवति। एतत् - तथ्यं ध्यायन्तः नगराभ्यन्तरे तेषाम् आवासस्य व्यवस्थायाः कृते वयं अतिबृहतीम् एकां योजनां विरचितवन्तः, यतो हि नगरं प्रति यदा श्रमिकः आगमिष्यति, सः स्वीय-कार्यार्थं मुक्तमनसा पूर्णविश्वासेन च अग्रेसर्तुं शक्ष्यति।

मम प्रियाः देशवासिनः, एतदपि सत्यं यत् विकास - यात्रायाम् अस्याम् अपि वयं दृष्टवन्तः – यथा सामाजिक - जीवने केचन वर्गाः पश्चवर्तिनो भवन्ति, निर्धनताताः बहिः निष्क्रान्तुं नैव शक्नुवन्ति, तथैव राष्ट्रिय - जीवनेऽपि कानिचन क्षेत्राणि भवन्ति, केचन च भू - भागाः वर्तन्ते, ये पश्चवर्तिनो भवन्ति । आत्म - निर्भरं भारतं विनिर्मातुं, अस्माकं कृते सन्तोलित - विकासः परमावश्यकः, तथा च वयं दशोत्तर – शताधिकान् आकाङ्क्षिणः जनपदान् अभिज्ञातवन्तः । एतान् दशोत्तर-शताधिकान् जनपदान्, ये हि सामान्यतोऽपि अधिकाः पश्चवर्तिनो वर्तन्ते, ते राज्यस्य राष्ट्रस्य च सामान्य - स्थितिं यावत् सन्नेयाः सन्ति, सर्वस्यां परिमितौ आनेयाः वर्तन्ते । तत्रत्याः जनाः भद्रतरां शिक्षाम् अवाप्नुयुः, तत्रत्येभ्यः जनेभ्यः समुचितानि स्वास्थ्य-सौविध्यानि सुलभानि स्युः, तत्रत्यानां जनानां कृते वृत्तितायाः स्थानीयावसराः समुत्पादिताः स्युः, एतदर्थं वयम् अनारतम् दशोत्तर - शताधिकान् जनपदान्, ये अस्मदीयायां विकासयात्रायां कुत्रचित् पश्चभागे स्थिताः सन्ति, तान् अग्रे सन्नेतुं प्रयासान् विदध्मः।

मम प्रियाः देशवासिनः, आत्म - निर्भरस्य भारतस्य मुख्या प्राथमिकता अस्ति - आत्म - निर्भरा कृषिः आत्म - निर्भरः कृषकः च, एतौ कदाचिदपि उपेक्षितुं वयं नैव शक्नुमः। विगतेषु दिनेषु वयं कृषकान् दृष्टवन्तः। एकानुपदम् अपरः इत्यनेके परिष्काराः, स्वातन्त्र्यावाप्तेः एतावतां वर्षाणाम् अनन्तरं विहिताः सन्ति। कृषकाः सर्वेभ्योऽपि बन्धनेभ्यः मुक्ताः भवेयुः, तत्कार्यं वयं कृतवन्तः।

भवन्तः कल्पयितुं नैव पारयन्तः स्युः, अस्माकं देशे यदि भवन्तः फेनिल - निर्माणं कुर्वन्ति, तर्हि हिन्दुस्थानस्य कस्मिन् अपि कोणे गत्वा तानि फेनिलानि विक्रेतुं शक्नुवन्ति; यदि भवान् वस्त्राणि विनिर्माति, तदा हिन्दुस्थानस्य कस्मिन् अपि कोणे गत्वा तानि वस्त्राणि विक्रेतुं शक्नुवन्ति; भवान् शर्करा-निर्माणं करोतु, भवान् शर्करां विक्रेतुम् अर्हन्ति, परञ्च जनानां बहुसंख्यं नावगतं स्यात् यत् मदीय - देशस्य कृषकः, यत् उत्पादयति स्म, न सः स्वीय - समीहानुसारं तत् विक्रेतुं शक्नोति स्म, न वा स्वीय - समीहानुसारं तत् यत्र विक्रेतुं समीहते स्म, तत्र नैव विक्रेतुं शक्नोति स्म; तदर्थं या सीमा निर्धारितासीत्, तत्रैव तेन तत् विक्रेतव्यम्  आसीत्। तानि सर्वाणि बन्धनानि वयम् दूरीकृतवन्तः।

इतः परं हिन्दुस्थानस्य कृषकः तं स्वातन्त्र्य - श्वासम् आदातुं शक्ष्यति यमाधृत्य सः हिन्दुस्थानस्य कस्मिन् अपि कोणे, जगतः कस्मिन् अपि कोणे नैजोत्पादान् विक्रेतुं वाञ्छति, सः स्वीय-समयानुसारं विक्रेतुं शक्ष्यति। वयं कृषकाणाम् आय - जातं विवर्धयितुं अनेकेषु वैकल्पिक - वस्तुषु अपि सबलं प्रायतन्। तस्य कृषि - कर्मणि विनिवेश्य - मूल्यं केन प्रकारेण न्यूनं स्यात् ? सौरोदञ्चाः [ Solar pumps] – तस्मै डीजलोदञ्चेभ्यः केन प्रकारेण मुक्तिं दद्युः ? अन्नदाता, ऊर्जादाता केन प्रकारेण भवेत् ? मधु – मक्षिका - पालनं वा मत्स्य - पालनं वा कुक्कुट - पालनं स्यात्, एतादृन्शि अनेकानि वस्तूनि तेन साकं संयोजितानि स्युः, येन तस्य आयः द्विगुणितः भवेत्, तस्यां दिशि वयम् अनारतं कार्याणि कुर्मः।

साम्प्रतं समयस्य अपेक्षास्ति यत् अस्मदीयं कृषि - क्षेत्रम् आधुनिकं भवेत् । मूल्य - वृद्धिः स्याद्वा मूल्य - सङ्कलनम्, खाद्य -प्रसंस्करणं भवेद्वा सम्पुटीकरणस्य व्यवस्था स्यात्, तस्य वा सम्भालनस्य व्यवस्था भवेत्, अत एव समीचीनस्य आधार-स्वरूपस्य आवश्यकता वर्तते।

भवन्तः अवलोकयन्तः भवेयुः – अस्मिन् कोरोना – काल - खण्डे एव विगतेषु दिनेषु लक्ष – कोटि - रुप्यकाणि भारत - सर्वकारेण कार्षिकाधार - स्वरूपार्थं आबण्टितानि। आधार - स्वरूपमिदं कृषकाणां कल्याणार्थं भविता, अस्य कारणात् कृषकाः स्वीयानि मूल्यानि अपि अवाप्तुं शक्ष्यन्ति, जगतः विपण्यां विक्रेतुमपि पारयिष्यन्ति, विश्व - विपण्यां तस्य गतिः विवर्धिता।

सम्प्रति ग्रामीणोद्योगानां दृढीकरणस्य आवश्यकतास्ति। ग्रामीण - क्षेत्रेषु विशिष्ट - प्रकारेण आर्थिक - समूहाः विनिर्मास्यन्ते।  ग्रामाभ्यन्तरे कृषेः कृषीतरेषाञ्च उद्योगानां जालं

विनिर्मास्यते, अनेन युगपदेव कृषकाणां कृते येषां नवीनानां कृषकोत्पादक - सङ्घानां निर्माणार्थम् अस्माभिः यत् प्रयतितम्, तद्धि स्वस्मिन् आर्थिक -क्षमीकरणस्य बृहत्तरं कार्यं करिष्यति।

भ्रातरः भगिन्यश्च, विगते पर्याये अहमत्र जल – जीवन -कार्यक्रमस्य घोषणां कृतवान्, अद्य सः वर्षावधिः सञ्जातः। अहमद्य सगर्वं वक्तुं शक्नोमि यत् 'नल से जल' - इति 'प्रणालिकातः जलम्' - इति पानीयस्य शुद्ध - जलस्य यत् स्वप्नम् अस्माभिः दृष्टम्, अस्माकं देशवासिभ्यः नूनमिदं प्राप्येत, स्वास्थ्य - समस्यानां समाधानमपि शुद्ध-पानीयेन सम्बद्धं भवति। अर्थव्यवस्थायामपि अस्य अतितरां महद् - योगदानं भवति ... एतदभिलक्ष्यैव जल – जीवन - कार्यक्रमः आरब्धः।

अद्याहं सन्तोषम् अनुभवामि यत् प्रतिदिनं वयं लक्षाधिक - गृहेषु जलं प्रापयामः ... प्रणालिकया जलं प्रापयामः। विगतैक - वर्षे द्वि – कोटि - परिवारेभ्यः जलं प्रदातुं वयं सफलाः अभवाम । विशेषेण अरण्येषु सुदूरं निवसतां अस्माकम् आदिवासिनां गृहाणि यावत् जल - प्रापणस्य कार्यं ... बृहत् अभियानं प्राचलत् । प्रसीदामि यत् साम्प्रतं 'जल – जीवन - कार्यक्रमः ' देशे स्वस्थायाः स्पर्धायाः परिवेशं विरचितवान् । प्रत्येकमपि जनपदानां मध्ये स्वस्थाः स्पर्धाः भूयन्ते, नगराणां मध्ये स्वस्थाः स्पर्धाः भूयन्ते, राज्यानां मध्ये च स्वस्थाः स्पर्धाः सम्पद्यन्ते। प्रत्येकमपि जनाय प्रतिभाति यत् प्रधानमन्त्रिणः 'जल – जीवन - कार्यक्रमस्य' यत् स्वप्नमस्ति, तत् वयं सत्वरमेव स्वीय - क्षेत्रेषु पूर्णतां नेष्यामः। Cooperative Competitive Federalism – इति सहभागिता –स्पर्धा - सङ्घस्य अभिनवा ऊर्जा जल – जीवन - कार्यक्रमेण साकं संयुक्ता जाता, अनया च सार्धमपि वयं अग्रेसरामः।

मम प्रियाः देशवासिनः, भवतु नाम तदस्मदीयं कृषि - क्षेत्रम्, अस्तु वा अस्माकं लघूद्योगानां क्षेत्रम्, भवन्तु वा अस्माकं सेवा – वृत्तिता - निरतस्य समाजस्य जनाः, प्रायेण एते सर्वेऽपि जनाः एकप्रकारेण भारतस्य अतिबृहन् - मध्यम - वर्गत्वेन सन्ति । मध्यम - वर्गात् आगताः व्यवसायिनः अद्यत्वे जगति सुप्रतिष्ठिताः सन्ति। मध्यम - वर्गात् आगताः अस्माकं चिकित्सकाः, अभियन्तारः, अधिवक्तारः, विज्ञानिनः चेत्यादयः सर्वे जगति स्वीयां प्रतिभां प्रदर्शयन्ति, सुप्रतिष्ठिताः च वर्तन्ते। अत एव वृत्तमिदं सुतरां सत्यं यत् मध्यम - वर्गः यावतः अवसरान् प्राप्नोति, सः अनेकधा ऊर्जया सह आत्मानं प्रतिष्ठाप्य उपतिष्ठन्ते। अत एव मध्यम - वर्गः सर्वकारीय - हस्तक्षेपात् मुक्तिम् अभिलषति, मध्यम - वर्गाय अनेके नूतानाः अवसराः

अपेक्षन्ते, ते अनावृतं प्राङ्गणम् अपेक्षन्ते, अस्माकं सर्वकारः सततं मध्यम - वर्गस्य एतानि स्वप्नानि पूरयितुं कार्याणि विदधाति। मध्यम - वर्गः आश्चर्यपूर्णानि कार्याणि अनुष्ठातुं समर्थः वर्तते । 'Ease of living ...' इत्यस्य बृहत्तमः लाभः यदि कस्मैचित् भविष्यति चेत्तर्हि मम मध्यम - वर्गस्य परिवाराणां कृते एव सम्पत्स्यते। अल्प - मूल्यात्मकस्य अन्तर्जालस्य वृत्तं वा स्यात्, भवतु वा न्यून - मूल्यात्मकस्य 'स्मार्ट - फोन' इति चल – दूरभाष - यन्त्रस्य वृत्तम् आहोस्वित् उड्डयनार्थं वायु - यानानां चिटिकानां अल्प - मूल्यात्मकं सम्भाव्यं वृत्तं भवेत् अथवा अस्मदीयाः राजमार्गाः स्युः वा सूचनामार्गाः भवेयुः - एतानि सर्वाणि वस्तूनि मध्यम - वर्गस्य शक्तेः वर्धक-तत्वानि सन्ति। सद्यः भवन्तः दृष्टवन्तः स्युः - मध्यम - वर्गस्य निर्धनतातः निर्गतानां प्रथमं स्वप्नं भवति यत् तस्य नैजं गृहं स्यात्, सः तुल्यात्मकं जीवनं जीवितुं वाञ्छति । देशे बृहत्तमं कार्यम्, वयं 'E M I' – इति प्रतिमासं प्रदेयांश - क्षेत्रे कृतवन्तः। एतस्माच्च कारणात् 'Home Loan' - इति गृह - ऋणानि अल्पार्घाणि जातानि । यदा एकस्य गृहस्य कृते कश्चन ऋणम् आददाति, तदा ऋण - प्रतिशोधनं यावत् प्रायेणासौ षट् –लक्ष - रूप्यकात्मकं व्यवकलनम् अवाप्नोति। विगतेषु दिनेषु अवधान -पुरस्सरम् अवगतं यत् अतिनिर्धन - मध्यम - वर्गयोः परिवारैः धनं विनिविष्टं परञ्च योजनाः नैव पूर्णताङ्गताः इति कृत्वा ते नैजं गृहं नैव अवाप्नुवन्ति ... भाटकं प्रदेयं भवति । भारत- सर्वकारः पञ्च - विंश- सहस्र – कोटि - रूप्यकात्मकं विशिष्ट - निधिं निर्माय यानि अपूर्णानि गृहाणि सन्ति, तानि च पूर्णानि विधाय मध्यम – वर्गीय - परिवाराः गृहाणि प्राप्नुयुः ... एतदर्थञ्च वयं समुपायान् विदध्मः।

'G S T' – इति वस्तु – सेवा - कराधानेषु सत्वरतया करारोपणं न्यूनं जातम्, आयकरः अल्पीभूतः। सम्प्रति न्यूनतमाधारेण तत्प्रकारिकाभिः व्यवस्थाभिः साकं वयं देशम् अग्रे सन्नेतुं प्रयतामहे। नैगम - बैंकानां 'R B I' - इत्यनेन संयोजनम् ... एतत्तु स्वस्मिन् मध्यम - वर्गीयाणां परिवाराणां धनं सुरक्षितुं प्रतिभूति - रूपेण वर्तते।

'M S M E' - इति अतिलघु – लघु – मध्यमोद्योग - क्षेत्रेषु ये परिष्काराः विहिताः, कृषि - क्षेत्रे च ये परिष्काराः कृताः, एतेषां साक्षात् - लाभान् अस्माकं एते मध्यमवर्गीयाः श्रमशीलाः परिवाराः प्राप्स्यन्ति, तस्माच्च कारणात् सहस्रशः कोटिशः च रूप्यकाणां विशिष्ट - निधिं दद्मः, अस्माच्च अस्माकं व्यापारि - बान्धवाः, अस्मदीयाः लघूद्योगिनः च लाभान्विताः भविष्यन्ति।

सामान्यस्य भारतीयस्य शक्तिः, तस्य ऊर्जा च आत्म – निर्भर - भारताभियानस्य बृहत्तमः आधारोऽस्ति। शक्तिमेनां सततं सन्धारयितुं प्रत्येकमपि स्तरे कार्यं सततं प्रवर्तते।

मम प्रियाः देशवासिनः, आत्म – निर्भर - भारतस्य निर्माणे, आधुनिक - भारतस्य निर्माणे, नूतन - भारतस्य निर्माणे, समृद्धस्य आनन्दपूर्णस्य च भारतस्य निर्माणे, देशस्य शिक्षा - व्यवस्थायाः प्रभूत - सार्थकत्त्वं वर्तते। एतेनैव विचारेण देशं दशक - त्रयानन्तरं नूतन – शिक्षा - नीतेः सम्प्रदानेन वयं यशस्विनः संजाताः। भारतस्य प्रत्येकं भागे अस्य स्वागतस्य वृत्तानि नूतनोर्जां नवीनं च विश्वासं जनयन्ति। एषा शिक्षा - नीतिः अस्माकं विद्यार्थिनः मूलेन योजयिष्यति, सहैव च तान् विश्व - नागरिकान् भवितुमपि सामर्थ्यं प्रदास्यति। विद्यार्थिनः मूल - बद्धास्तु स्थास्यन्ति, परं तेषां शिरांसि आकाशोन्मुखीनि भविष्यन्ति। अद्य भवद्भिः दृष्टं स्यात् यत् शिक्षा - नीतौ राष्ट्रिय – शोध - प्रतिष्ठानोपरि विशेष - बलं प्रदत्तम्। यतो हि देशस्य विकासाय नवाचारः अत्यावश्यकः। यावत् बलं नवाचाराय, शोधाय च प्रदास्यते तावद् एव देशमुन्नेतुं स्पर्धासंसारे अग्रेसर्तुं च शक्तिः प्राप्स्यते।

किं भवद्भिः कदाचित् चिन्तितं स्यात् यत् अपि एतादृक् तीव्र - गत्या ग्रामं यावत् ऑन् –लाइन् - इति सद्यस्कः कक्षाणां परिवेश - निर्माणं भवितुमर्हति ? यदा कदा समस्यास्वपि एतादृक्परिस्थितयः उद्भवन्ति याभिः नूतनोर्जासञ्चारः भवति। भवद्भिः दृष्टं भवेद् यत् कोरोना - काले ऑन – लाइन - कक्षाणां संस्कृतिः सर्वत्र स्थापिता अस्ति। ऑन – लाइन - डिजिटल - अन्तरणमपि तीव्रतया वर्धमानमस्ति। एतद्ज्ञात्वा गर्वोऽनुभूयते यत्भारत - सदृशे देशे केवलेन एकेन भीम – यू पी आई - माध्यमेन एक - मासावधौ त्रिलक्ष – कोटि - रूप्यकाणां अन्तरणं जातमस्ति। वयं आत्मानं परिवर्तितासु परिस्थितिषु कथं समायोजितं कुर्मः – एतत् अस्य उदाहरणम् अस्ति।

भवन्तः पश्यन्तु यत् चतुर्दशोत्तर – द्विसहस्रतम - वर्षतः पूर्वम् अस्माकं देशे षष्टि - मितेषु ग्राम – पंचायतेषु ऑप्टिकल् - फाइबर - इति चाक्षुष - तन्तुः स्थापितः आसीत्। विगत - पञ्च - वर्षेषु सार्धैक - लक्ष – पञ्चायतेषु चाक्षुष - तन्तुः प्रसारितः। येन प्रशासने अतीव साहाय्यं भवति। प्रथमतः अस्माभिः सर्वेषु पंचायतेषु एतस्य विस्तराय कार्यम् आरब्धम । अवशिष्टेषु लक्ष - मितेषु पंचायतेषु एतस्य प्रसाराय तीव्राभियानं प्रचलति। परं परिवर्तितासु परिस्थितिषु डिजिटल् - भारते ग्रामस्यापि सहभागित्वम् अनिवार्यं जातम् ।

ग्रामीणेष्वपि ऑन – लाइन – सौविध्यानाम् आवश्यकता अभिवर्धितास्ति। प्रथमतया अस्माभिः प्रत्येकं पंचायते चाक्षुष – तन्तु - स्थापनाय योजितमासीत् परमद्याहं सूचितुम् इच्छामि यदस्माभिः निर्णीतमस्ति यत्सर्वेषु षण्लक्षाधिकेषु ग्रामेषु चाक्षुष – तन्तु – जाल - स्थापनं करणीयमिति। आवश्यकताः अभिवर्धिताः येनास्माभिः प्राथमिकतापि परिवर्तिता । षण्लक्षाधिकेषु ग्रामेषु सहस्र – लक्ष – किलोमीटरमितं यावत् चाक्षुष – तन्तु – जाल - स्थापनाभियानं संचालयिष्यते। अस्माभिः निर्णीतम् यत् एक – सहस्र - दिनेषु देशस्य षण्लक्षाधिक - ग्रामेषु चाक्षुष – तन्तु - स्थापनं सम्पादयिष्यते।

परिवर्तमाने प्रविधौ साइबर् - इति सांगणिक - परिक्षेत्रे अस्माकं निर्भरत्वं वर्धमानमस्ति। परं सांगणिक - परिक्षेत्रेण साकं सङ्कटानि अपि समाविष्टानि । अखिलमपि विश्वं स्म्यक्तया जानाति यद् अनेन हि देशस्य सामाजिक – स्वरूपे, अस्माकम् अर्थव्यवस्थायाम्, अस्मदीय – विकासे च संकटोपपादनस्य सरलमार्गः अपि भवितुमर्हति। एतत्कारणेन भारतं सुतरां सचेष्टमस्ति। भारतं सतर्कमस्ति; एतेषां संकटानां सम्मुखीकरणाय निर्णयाश्चापि विधीयन्ते। एतावद् एव नालम् | युगपदेव नूतनाः व्यवस्थाः सततं विकास्यन्ते । अतितराम् अल्प - समये नूतनायाः सांगणिक – सुरक्षा – नीतेः प्रारूपः देशस्य सम्मुखं प्रस्तोष्यते। अनागत - समये एतेषां सर्वेषां एकांशानां संयोगेन सांगणिक – सुरक्षान्तर्गतम् अस्माभिः सम्भूय चलनीयं भविष्यति। तस्य कृतेऽपि अग्रेसरणार्थं वयं रणनीति - निर्माणं करिष्यामः।

मम प्रियाः देशवासिनः, भारते महिला - शक्त्यै यदा – यदापि अवसराः प्राप्ताः, ताभिः देशस्याभिधानं आलोकितमस्ति। देशः दृढीकृतः । देशः अद्य महिलानां कृते वृत्तितायाः स्व – वृत्तितायाः च समानावसरान् प्रदातुं प्रतिबद्धः अस्ति। भारतेऽद्य महिलाः भूम्यन्तर - कृष्णांगार - खनिसु कार्यरताः सन्ति, अपरतश्च अद्य मदीय – देशस्य पुत्र्यः योद्धृ - विमानानां संचालनेन प्रोत्तुङ्गानि गगन – शिखराणि चुम्बन्ति ।

भारतमद्य संसारस्य कतिपयेषु देशेषु अन्यतमः यत्र नौ - सेनासु वायु - सेनासु च महिलाः योद्धृ - भूमिकासु समावेश्यन्ते । गर्भवतीभ्यः षण्मासानां सवैतनिकस्य अवकाशस्य निर्णयः भवेत् अथवा त्रि – तलाक – इत्यनेन पीडितानाम् अस्माकं मोहम्मदीय - भगिनीनां मुक्तेः स्वाधीनतायाः च भवेत्, महिलानाम् आर्थिक – क्षमीकरणस्य विषयः स्यात् ...

चत्वारिंशत् –कोटि - मितासु जन –धन - लेखासु  द्वाविंश –कोटि - मिताः महिलाः  सन्ति, कोरोना - काले प्रायशः त्रिंशत् –कोटि - मितानि रूप्यकाणि एतासां भगिनीनां लेखासु अन्तरितानि  सन्ति। प्रायेण पंच - विंशति –कोटि - रूप्यकाणां मुद्रा - ऋणेषु प्रतिशतं सप्तति –मितानि मुद्रा - ऋणानि  अस्माकं मातृभिः भगिनीभिश्च अवाप्तानि । प्रधानमंत्र्यावास - योजनान्तर्गतं यत् स्वीय –गृहं प्राप्यते, तत्र अधिकतमं पंजीकरणमपि महिलानां नामसु भवति।

मम प्रियाः देशवासिनः, निर्धनानां भगिनीनां पुत्रीणां च उत्कृष्टतर - स्वास्थ्यस्य चिन्ताऽपि सर्वकारः सततं करोति।  अस्माभिः जनौषधि - केन्द्राणां माध्यमेन एकरूप्यक –मूल्यात्मकानि  आरोग्योपधानानि  व्यवस्थाप्य सुतरां बृहत् कार्यम् अनुष्ठितम् । षट्सहस्र –जनौषधि - केन्द्रषु अल्प - समये एव प्रायेण  पंच - कोटितः अप्यधिकानि आरोग्योपधानानि अस्माकं निर्धन –महिलानां कृते प्रापितानि सन्ति ।  पुत्रीषु कुपोषणं समापयितुं, तासां विवाहस्य समुचित –वयः किं भवेत् इति विचारार्थम् एका समितिः अस्माभिः विरचिता अस्ति। तस्याः विवरणानुसारेण पुत्रीणां विवाहावस्था - विषये समुचिताः निर्णयाः  विधास्यन्ते ।

मम प्रियाः देशवासिनः, अस्मिन् कोरोना - काले स्वास्थ्य - क्षेत्रस्य विषये ध्यानाकर्षणं स्वाभाविकमस्ति। अस्मिन् संकट - काले स्वास्थ्य - क्षेत्रेण अस्मान्  आत्म - निर्भरतायाः महत्तमः पाठः पाठितः। तत् च लक्ष्यं साधयितुम् अस्माभिः अग्रे चलितव्यमस्ति। भवन्तः पश्यन्तु, यत्कोरोना –संक्रमणात् प्राक् अस्माकं देशे केवलम् एका परीक्षणशाला आसीत्। परमद्य चतुर्दश –शत - मितानां परीक्षण - शालानां जालं भारतस्य प्रत्येकं दिशि प्रसृतमस्ति। यदा कोरोना –संकटम् आपतितं तदा एकस्मिन् दिने केवलं त्रिशत –मितानि परीक्षणानि सम्भवन्ति स्म । परम् अल्प - समये एव अस्माकं विशेषज्ञैः स्वीयं शक्ति - प्रदर्शनं विहितं येनाद्य प्रतिदिनं सप्त - लक्षाधिकानि परीक्षणानि कर्तुं वयं शक्नुमः । कुतः त्रिशतात् आरब्धम् आसीत्, कुतः च वयं सप्त - लक्षं यावत् सम्प्राप्ताः स्मः।

देशे नूतनानाम् अखिल –भारतीयुर्विज्ञान - संस्थानानां स्थापनं, नवीनानां चिकित्सा - महाविद्यालयानां निर्माणम्, आधुनिकीकरणं च सततं सम्पाद्यमानमस्ति। विगत –पंच - वर्षेषु एम. बी. बी. एस् ., एम. डी. - पाठ्यक्रमेषु पंच - चत्वारिंशत्सहस्राधिक -  विद्यार्थिनां कृते स्थानाभिवर्धनं कृतमस्ति। ग्रामेषु सार्धैक - लक्षाधिकानां स्वास्थ्य - केन्द्राणां स्थापनं

विधीयमानमस्ति। तेषु प्रायेण प्रतिशतं त्रयस्त्रिंशत् – मिताः पूर्वमेव कार्यरताः संजाताः। कोरोना - काले स्वास्थ्य - केन्द्रैः ग्रामेषु साहाय्या - नुष्ठानस्य महद्भूमिका निर्व्यूढास्ति।

स्वास्थ्य - क्षेत्रे अद्य – प्रभृति एकं महाभियानं आरभते, तस्मिन् च च प्रविधेः महती भूमिका भविष्यति। अद्य – प्रभृति नेशनल – डिजिटल - हैल्थ – मिशन् इति राष्ट्रिय – अंकीय – स्वास्थ्य - अभियानस्य आरंभः विधीयते । एतत् भारतस्य स्वास्थ्य – क्षेत्रे नवीनां क्रान्तिं प्रवर्तयिष्यति । चिकित्सायाम् आपद्यमानानां समस्यानां समाधानार्थम् अत्र प्रविधेः सुविचारितोपयोगः करिष्यते। प्रत्येकं भारतीयाय एकं स्वास्थ्य – परिचय - पत्रं प्रदास्यते। एतत् परिचय - पत्रं प्रत्येकं भारतीयस्य स्वास्थ्य – लेखामिव कार्यम् आचरिष्यति । भवतां प्रत्येकं स्वास्थ्य - परीक्षणं, रोग - विवरणं, केन चिकित्सकेन किं परीक्षितम् ? का औषधिः कदा च प्रदत्ता ? किं निदानमासीत् ? तस्य वृत्तान्तश्चादयः सर्वाः सूचनाः स्वास्थ्य - परिचयपत्रे समाहिताः भविष्यन्ति। चिकित्सकेन साकं नियोजनं वा भवेत्, धन – प्रदानम्, चिकित्सालये परिपत्रोपकल्पनस्य त्वरा वा स्यात्, एतासां सर्वासां समस्यानां समाधानं राष्ट्रिय – अंकीय – स्वास्थ्य - अभियानेन सम्भाव्यं भविष्यति । अस्य साहाय्येन अस्माकं नागरिकाः उत्तम - स्वास्थ्यस्य कृते समीचीनं निर्णयं विधातुं पारयिष्यन्ति । एषा व्यवस्था साम्प्रतम् उपलप्स्यते।

मम प्रियाः देशवासिनः, यदापि कोरोनायाः चर्चा भवति, तदा स्वाभाविक – रीत्या प्रत्येकं मनसि प्रश्नः समुदेति यदस्य सङ्क्रम – निवारकं कदाऽवाप्स्यते ? अयं प्रश्नः अखिल - विश्वे प्रत्येकं मनसि वर्तते। अहमद्य देश – वासिनः कथयितुम् इच्छामि यदस्मदीयाः प्रतिभावन्तः वैज्ञानिकाः, ऋषि-मुनिमिव सन्ति । ते हि प्रयोगशालासु सततं प्राण - पणेन युक्ताः, अखण्डम् एकनिष्ठं च तपः आचरन्ति। अतिकठिन - श्रमं कुर्वन्ति। येन भारते न केवलम् एकं, द्वे वा अपितु त्रीणि सङ्क्रम-निवारकाणि परीक्षणानां विभिन्न - चरणेषु वर्तन्ते। वैज्ञानिकानां निर्णयानन्तरं तेषां प्रभूतोत्पादनं भविष्यति। एतस्य कृतेऽपि अस्माकं सन्नद्धता पूर्णतया परीक्षितास्ति। अनेन सहैव प्रत्येकं भारतीयं प्रति स्वल्पावधौ एव अस्य वितरणस्य योजनाऽपि उपकल्पितास्ति।

मम प्रियाः देशवासिनः, अस्माकं देशे पृथक् – पृथक् – क्षेत्रेषु विकासावस्थाः भिन्नाः सन्ति। कानिचिच्छेत्राणि सुबहु विकसितानि अन्यानि च पश्चवर्तीनि सन्ति। एतदसन्तोलनम् आत्म - निर्भर - भारतं पुरतः महत् - समाह्वानत्वेन प्रवर्तते । एतत्कृते यथा मया पूर्वमेव

कथितम्; यद् वयं दशोत्तरैक – शतानाम्  आकांक्षि - जनपदानां विकासाय प्रतिबद्धाः। तान् विकास - मानकेषु तुल्यान् कर्तुम् इच्छामः। विकासस्य परिस्थिति – तन्त्र - निर्माणं, सम्पर्कोन्नती - करणं चैते अस्माकं प्राथमिकते स्तः। साम्प्रतं  भवन्तः पश्यन्तु, यद् हिन्दुस्थानस्य  पश्चिमः भागः, तथा च हिन्दुस्थानस्य  मध्य – पूर्वीयः  भूभागः, पूर्वीयोत्तरप्रदेशः भवेत्, बिहारं स्यात्, बंगालं भवेत्, उत्तरपूर्वीयः वा  प्रदेशः स्यात्, ओडिशा वा भवेत् ... एतानि सर्वाण्यस्माकं क्षेत्राणि सन्ति, यत्र असीमिता सम्पदा अस्ति, प्राकृतिक - संसाधनानि च सन्ति। अत्रत्याः जनाः सामर्थ्यवन्तः, शक्तिमन्तः, प्रतिभावन्तश्च  वर्तन्ते । परम् अवसराणाम् अभावेन एतेषु क्षेत्रेषु असन्तोलनं सञ्जायते । एतत्स्थितेः परिष्कारार्थम्  अस्माभिः  नैकाः नूतनोपायाः आचरिताः। ईस्टर्न -  डेडिकेटिड - फ्रेट् – कोरिडोरिति  पूर्वीय – समर्पित – पण्यवहन - सम्पथं भवेद्, पूर्वीय – भारते  वाति – प्रणालिकया संयोजनस्य वृत्तं  वा स्यात्, नूतन – वाहनपथ – रेल -  मूलाधार-स्थापनं वा  भवेत् अथवा नवानां नौ - पत्तनानां  निर्माणं स्यात्; अर्थात्  पूर्ण - विकासस्य कृते  मूलाधारस्य यत्संरचना  अपेक्षिता भवति, तस्याः  समग्र - रीत्या विकासाय वयं प्रयतामहे ... ।

तथैव  लेह – लद्दाख -  कारगिल -  जम्मू – कश्मीरेति क्षेत्राणि  वर्ष  - पूर्वं सप्तत्युत्तर – त्रिशत – तमानुच्छेदात् मुक्तानि ।  अस्य वर्षावधिः  व्यतीतोऽस्ति। एषः वर्षावधिः जम्मू - कश्मीरस्य नूतन -  विकास - यात्रायाः महत्त्वपूर्णं  चरणमस्ति।  अयं वर्षावधिः तत्रत्यानां महिलानां दलितानां च कृते मूलाधार – प्रदायकः  काल - खण्डः  अवर्तत।  एषः  अस्माकं शरणार्थिनां कृते  गरिम्णा पूर्ण – जीवनस्य  प्रदातृ - कालः आसीत्। विकासस्य लाभान् ग्रामेभ्यः निर्धनेभ्यश्च  प्रापयितुं 'बैक्  टु विलेजेज्'  सदृशाभियानानि  प्रचाल्यन्ते । साम्प्रतम् 'आयुष्मान्  योजना'  जम्मू – कश्मीर – लद्दाख - क्षेत्रेषु श्रेष्ठतर – रीत्या समुपयोज्यते।

मम प्रियाः देशवासिनः, लोकतन्त्रस्य दृढत्वं अस्य वास्तविकी शक्तिश्च अस्माकं निर्वाचितेषु स्थानीयेषु एकांशेषु वसतः। अस्माकं सर्वेषां कृते गौरवास्पदं वृत्तमस्ति यज्जम्मू - कश्मीरे स्थानीयानाम् एकांशानां जन - प्रतिनिधयः सक्रियतया, सम्वेदन - शीलतया च विकासस्य नवयुगं अग्रे नयन्ति। एतत्कृतेऽहं तत्रत्येभ्यः सर्वेभ्यः पंच - सरपंचेभ्यः विकास - यात्रायां तेषां सक्रिय - सहभागितायै हृदयेन बहु वर्धापनं व्याहरामि। जम्मू - कश्मीरे परिसीमनस्य प्रक्रिया प्रचलति। सर्वोच्च - न्यायालयस्य सेवा – निवृत्तस्य न्यायमूर्तेः आध्यक्ष्ये परिसीमनं भवति। यथाशीघ्रं परिसीमनस्य पूर्णे सति, तत्र निर्वाचनं भवतु, जम्मू - कश्मीरस्य

विधायकाः स्युः, जम्मू - कश्मीरस्य मंत्रिगणाः भवेयुः, जम्मू - कश्मीरस्य मुख्यमन्त्री च स्यात् ... नूतनोर्जया ते विकासपथे अग्रेसरन्तु, एतस्य कृते देशः प्रतिबद्धः, प्रयासरतः च अस्ति।

लद्दाखं केन्द्र - शासितं प्रदेशं कृत्वा नैक - वर्षाणां तत्रत्य - जनानां या अभ्यर्थनाऽसीत्, तेषाम् आकांक्षा अवर्तत, तस्याः आकांक्षायाः परिपालनस्य, तस्याः सम्मानस्य च महत्कार्यम् अस्माभिः सम्पादितमस्ति । हिमालयस्य उच्च - क्षेत्रेषु स्थितं लद्दाखं विकासस्य नूतन – शिखरं प्रति अग्रेसरति। साम्प्रतं तत्र केन्द्रिय - विश्व - विद्यालयः स्थाप्यते, नूतन – शोध – केन्द्राणि विनिर्मीयन्ते, भोजनावासालय – प्रबन्धनस्य पाठ्यक्रमाणां संचालनं च भवति। विद्युदूर्जायाः कृते सार्ध – सप्त – सहस्र – मेगावाट् - क्षमता - युतस्य सौर – उद्यानस्य निर्माण - योजना विधीयते।

परञ्च, मम प्रियाः देशवासिनः, लद्दाखस्य अनेकाः विशेषताः सन्ति, तासां सम्भालनं, परिष्कारः च करणीयौ स्तः । यथा उत्तर - पूर्वस्य सिक्किमेन जैविक – राज्यत्वेन स्वीयाभिज्ञानं स्थापितमस्ति, तथैव लद्दाख – लेह - कारगिलेति सम्पूर्ण – क्षेत्रम् अस्माकं देशस्य कृते कौकिलीय - निरपेक्ष – एकांश - रूपेण स्वीयम् अभिज्ञानं स्थिरीकर्तुं शक्नोति। एतस्य च कृते भारत - सर्वकारः तत्रत्यैः नागरिकैः सम्भूय प्रतिमान - रूपस्य प्रेरणा - रूपस्य च कौकिलीय – निरपेक्ष – विकास - प्रतिमानस्य, तत्रत्यानां आवश्यकतानां पूर्तियुतस्य प्रतिमानस्य ... दिशायां वयम् अग्रेसरामः ।

मम प्रियाः देशवासिनः, भारतेन प्रदर्शितमस्ति यत्पर्यावरणेन साकं सन्तोलनं स्थापयन्नपि तीव्रविकासः सम्भवः अस्ति। अद्य भारतम् ‘एकम् – विश्वम्, एकः – सूर्यः, एकम् - जालम् - इति दृष्ट्या अखिलं विश्वं, विशेषतया च सौरोर्जा - क्षेत्रे उत्प्रेरयति । नवीकरणीय - ऊर्जायाः उत्पादन - विषये भारतमद्य संसारस्य सर्वोत्कृष्टेषु पंच – देशेषु स्वीयं स्थानम् प्रतिष्ठापितवत् । प्रदूषणस्य समाधान - विषये भारतं जागृतमपि अस्ति, सक्रियं चापि अस्ति। स्वच्छ - भारताभियानं भवेत् अथवा धूम्र - मुक्त – पाकशाला – वातेः व्यवस्था भवेत्, एल. ई. डी. - विद्युद्दीपानां अभियानं भवेत्, सी. एन. जी. – इत्याधारिता गमनागमन - व्यवस्था वा स्यात्, अथवा वैद्युद – परिवहनस्य कृते प्रयासः वा भवेत् ... वयं सर्व – सम्भवोपायान् सर्वथा आचरामः। पैट्रोलिति शिलातैलेन सञ्जायमानं प्रदूषणं नियन्त्रयितुम् एथनॉल् - उत्पादनस्य सम्वर्धनाय, तस्य च प्रयोगाभिवर्धनाय सबलं प्रयतते। पंच – वर्ष – पूर्वम् अस्माकं

देशे एथनॉल् – उत्पादनस्य कीदृशी स्थितिः आसीत् ? पंच – वर्ष – पूर्वम् अस्माकं देशे एथनॉल् – उत्पादनं चत्वारिंशत्कोटि – लीटरमितं भवति स्म । साम्प्रतं पंच – वर्षेषु पञ्च – गुणितं सञ्जातम् । अद्य चास्योत्पादनम् अस्मदीये देशे द्विशत – कोटि - लीटरमितं सञ्जायमानमस्ति। यद्धि पर्यावरणस्य कृते बहूपयोगि सिद्ध्यति।

मम प्रियाः देशवासिनः, देशस्य चितेषु शतमितेषु नगरेषु प्रदूषणस्य न्यूनीकरणाय वयमेकेन समग्रोपागमेन जन - सहयोगेन, आधुनिकानां च प्रविधीनां प्रभूतोपयोगेन प्रदूषणोपशमनाय अभियान - रूपेण कार्यं करिष्यामः।

मम प्रियाः देशवासिनः, भारतं सगर्वं कथयितुं शक्नोति यत् इदं हि तेषु अल्प – संख्याकेषु देशेषु अन्यतमं यत्र वनानां विस्तरः भवति। स्वीय – जैव - विविधतायाः संरक्षण – संवर्धनयोः कृते भारतं पूर्णतया संवेदनशीलमस्ति। अस्माभिः साफल्येन व्याघ्र - परियोजना, हस्ति - परियोजना च संचालिते स्तः। अस्माकं वनेषु व्याघ्राणां संख्या संवर्धितास्ति। आगतेषु दिवसेषु एशियावर्तिनां सिंहानां संख्या - वर्धनाय 'सिंह - परियोजना' आरप्स्यते । एतदन्तर्गतं तेषां कृते यत्परिवेशः, मूलाधारः, सुरक्षा - व्यवस्था, स्वास्थ्याधारः वा आवश्यकः भवति, तेषां कृते कार्यं करिष्यते। अनेन सहैव वयं अन्यमेकं कार्यं संवर्धयितुमिच्छामः - तदस्ति - डॉल्फिन् - परियोजनायाः संचालनम् । एतदन्तर्गतं वयं नदीषु समुद्रेषु च निवसतां शिशुमाराणां प्रकार – द्वयस्य संरक्षणाय अवधास्यामः । एतेन जैव – विविधता सुदृढा भविष्यति, वृत्तितायाः अवसराः चापि उद्भविष्यन्ति । एतद्धि पर्यटनस्यापि आकर्षण - केन्द्रं भवति ... तर्हि अस्मिन् क्षेत्रेऽपि वयम् अग्रेगमिष्यामः।

मम प्रियाः देशवासिनः, यदा वयम् असाधारण – लक्ष्यम् अभिलक्ष्य असाधारण – यात्रां प्रति चलामः तदा, मार्गे समाह्वानानां प्राचुर्यं भवति । एताः उपहूतयश्चापि असामान्याः भवन्ति । एतासु सतीषु आपदासु सीमासु अपि देशस्य सामर्थ्यम् आह्वयितुं दुष्प्रयासाः आचरिताः । परं एल. ओ. सी. इति नियंत्रण – रेखातः एल. ए. सी. - इति वास्तविक – नियंत्रण - रेखां यावत् देशस्य संप्रभुतायां येन – केनापि दृष्टिपातः कृतः, अस्माकं सेनाभिः, वीर - सैनिकैः च तस्य तेषामेव भाषया उत्तरं प्रदत्तम्।

भारतस्य संप्रभुतायाः रक्षायै सम्पूर्ण - राष्ट्रं भाव - पूरितं संकल्प - प्रेरितं चास्ति, सामर्थ्येन सुदृढ – श्रद्धया च अग्रेसरति । एतत्संकल्पाय अस्माकं वीरसैनिकाः किं कर्तुं

पारयन्ति ? देशः च किं कर्तुम् अर्हति ? इति लद्दाखे विश्वेन सम्यग्दृष्टम् । अहमद्य मातृभूमौ प्राणार्पण – कर्तॄणां वीर – भटानां कृते रक्त - दुर्गस्य प्राचीरतः सादरं प्रणमामि।

आतंकवादः भवेत् वा विस्तारवादः, भारतमद्य तं दृढतया प्रतिकरोति । अद्य भारते संसारस्य विश्वासः दृढतरः संजातः । विगतेषु दिनेषु संयुक्त – राष्ट्र – सुरक्षा - परिषदः अस्थायि – सदस्यत्वेन निर्वाचने द्वि – नवत्युत्तरैकशत – मितेषु चतुरशीत्युत्तरैक – शत – मितानां देशानां समर्थन – प्राप्तिः प्रत्येकमपि भारतीयस्य कृते गौरवास्पदमस्ति। विश्वे कथमस्माभिः स्वीय - स्वीकार्यत्वं स्थापितमस्ति – एतस्य इदम् उदाहरणम् । इदन्तु तदैव सम्भाव्यते यदा भारतं स्वयं सुदृढं भवेत् । भारतं शक्तं सुरक्षितं च भवेद् इति विचारेण साकम् अद्य नैकेषु व्यूहेषु कार्यं सम्पाद्यमानमस्ति ।

मम प्रियाः देशवासिनः, अस्माकं प्रतिवेशिनः देशाः ये हि अस्माभिः साकं भूमिदृशा सामुद्रिकदृशा च सम्पृक्ताः सन्ति तैः सह वयम् अस्माकं सम्बन्धान् सुरक्षा - विकास - विश्वासस्य सहभागितया संयोजयामः। भारतस्य सततं प्रयासो वर्तते यत् स्वकीयैः प्रतिवेशि - देशैः सह वयम् अस्माकं प्राचीनतमान् आर्थिक – सांस्कृतिक – सामाजिक --सम्बन्धान् गहनान् करवाम। दक्षिण – एशिया - क्षेत्रे जगतः प्रतिशतं पञ्च - विंशमिता जन – संख्या निवसति। वयं संयोगेन सहभागितया च एतादृश्याः बृहत्याः जनसंख्यायाः समृद्धि - विकासयोः अनन्ताः सम्भावनाः उत्पादयि- तुम् अर्हामः। अस्य क्षेत्रस्य देशानां सर्वेषां नेतॄणाम् अस्य विशाल – जन - समूहस्य विकासाय प्रगतये च बृहत्तमम् उत्तरदायित्वं वर्तते यद्धि महत्वपूर्णम् उत्तरदायित्वम् अस्ति। तत् निभालयितुं दक्षिणैएशिया - द्वीपस्य समेषां क्षेत्राणाम् जनानां राजनेतॄणां सांसदानां बुद्धिजीविनाम् चापि आह्वानं करोमि । अस्मिन् सम्पूर्णे क्षेत्रे यावती शान्तिः भविष्यति, यावत् सौहार्दं भविष्यति, तावत्यौ एतन्मानवतायाः कृते कार्यसाधिके, मानवतायाः च हितावहे भविष्यतः ... सम्पूर्णस्य अपि जगतः हितम् अनयोः समाहितं वर्तते। अद्य प्रतिवेशिनः देशाः केवलं ते एव नैव सन्ति यैः साकम् अस्माकं भौगोलिक - सीमानः सम्मिलितास्सन्ति, अपितु ते अपि विद्यन्ते यैः समम् अस्माकं हृदयानि सम्मिलितानि सन्ति ... यत्र सम्बन्धेषु समरसता वर्तते, पारस्परिकं सौख्यं वर्तते । अहं प्रसन्नोऽस्मि - विगते कतिपये काले भारतेन विस्तारितस्य प्रतिवेशि - क्षेत्रस्य सर्वैः देशैः सह स्वकीयाः सम्बन्धाः दृढतराः कृताः । पश्चिमैशिया - क्षेत्रीयैः देशैः सह अस्माकं आर्थिक – राजनैतिक - मानवीयानां सम्बन्धानां प्रगतौ बहुगुणितं जवत्वम् अवाप्तम्... विश्वास: अनेकगुणीभूय विवर्धितः। एतैः देशै: समम् अस्माकम् आर्थिक -

सम्बन्धाः विशेषतः उर्जसः क्षेत्रे सहभागिता अत्यन्तं महत्वपूर्णा वर्तते। एतेषु कतिपयेषु देशेषु ... एषु सर्वेषु देशेषु ... अधिकतम - देशेषु बृहत्संख्यायाम् अस्माकं भारतीयाः भगिन्यः भ्रातरः च कार्यं कुर्वन्ति । येन प्रकारेण एतैः देशैः कोरोना - सङ्कट - समये भारतीयानां साहाय्यं कृतम्, भारत - प्रशासनस्य अनुरोधस्य सम्माननं विहितम्, तत्कृते भारतं तेभ्यः सर्वेभ्यः देशेभ्यः आभार - प्रदर्शनं करोति किञ्च अहमपि तेभ्यः आभार - प्रकटनं कर्तुं वाञ्छामि। एवमेव अस्माकं पूर्व - दिशि वर्तमानाः आसियान-देशाः ये अस्माकं सामुद्रिकाः प्रतिवेशिनः अपि सन्ति, ते अपि अस्माकं कृते अत्यन्तं महत्वं धारयन्ति । एतैः साकं भारतवर्षस्य सहस्रशो वर्षाधिकाः प्राचीनाः धार्मिकाः सांस्कृतिकाः च सम्बन्धाः विद्यन्ते। बौद्ध - धर्मस्य परम्परा: अस्मान् तै: सह योजयन्ति। साम्प्रतं भारतम् एतै: देशै: सह, केवलं सुरक्षाक्षेत्रेषु नैव अपितु सामुद्रिक –सम्पदा - क्षेत्रे अपि सहयोगं विवर्धयति। २३४६ ७३ 80

मम प्रियाः देशवासिनः, भारतस्य यावन्तः प्रयासाः :शान्ते सौहार्दस्य च कृते वर्तन्ते, तावती एव प्रतिबद्धता स्वकीयायै सुरक्षायै, स्व - सेनानां क्षमीकरणाय अपि वर्तते। रक्षोत्पादने आत्म - निर्भरस्य भारतस्य कृते बृहत्तमाः पदक्षेपाः समुत्थापिताः सन्ति। नातिचिरम् एव शताधिकानां सैन्योपकरणानाम् आयातः अस्माभिः प्रतिषिद्धः,प्रक्षेप्यास्त्रतः अल्पभारं- अल्पभारं योद्धृ-उदग्रयानं यावत्, आक्रामक-भुशुण्डिकातः परिवाहक-विमानानि यावत् सर्वमपि 'मेक इन इंडिया' इति भारते निर्मीयते। अस्मदीयम् तेजस् अपि··· स्वकीयं तेजः, स्वीयां तीव्रतां नैजां च शक्तिं प्रदर्शयितुम् आधुनिकावश्यकतानुसारं सज्जीभूयते। देशस्य सुरक्षायां अस्माकीनाः सीमानः, समुद्रतटीयस्य आधार-स्वरूपस्य च बृहती भूमिका वर्तते। अद्य हिमालयस्य शिखराणि स्युः, उत वा हिन्द-महासागरस्य द्वीपा:,प्रत्येकमपि दिशि सम्पर्कस्य विस्ताराय बलं प्रदीयते। लद्दाखतः अरुणाचलप्रदेश-पर्यन्तं बृहत्-स्तरे अस्मदीयस्य देशस्य सुरक्षां निध्याय नवीनाः मार्गाः सन्नद्धीक्रियन्ते।

मम प्रियाः देशवासिनः, अस्माकीनः एतादृश: व्यापकः समुद्रतटो वर्तते तथैव अस्माकं पार्श्वे त्रयोदश-शताधिकाः उपद्वीपा: सन्ति। कतिपयानां चितानाम् उपद्वीपानां महत्वं संदृश्य तीव्रतया तेषां विकासार्थं वयम् अग्रेसरामः। भवद्भिः दृष्टम् स्यात् यद् विगते सप्ताहे पञ्चदिवस-पूर्वम् अण्डमान-निकोबारे submarine optical fiber cable project इति सागरान्तर्वर्ति – चाक्षुष – तन्तु – योजनायाः लोकार्पणं विहितम्। अण्डमान - निकोबारेऽपि चेन्नई - दिल्ली - सदृशं अन्तर्जालीयं सौविध्यं इतः परं प्रापयिष्यते। अधुना वयम् लक्षद्वीपमपि एतेन प्रकारेण एव संयोजयितुं ...

कार्यजातम् अग्रे सारयिष्यामः । आगामिषु सहस्रदिनेषु लक्षद्वीपमपि तीव्र – गतिकेन अन्तर्जालीय – सौविध्येन संयोजयितुम् अस्माभिः लक्ष्यं विनिर्धारितम्। सीम्नः समुद्र – तटीय – क्षेत्रीयाणां यूनां विकास:.. तेषामपि... सुरक्षाम् केन्द्रीकृत्य विकासस्य प्रतिरूप - दिशि वयम् अग्रेसरामः। किञ्च तस्याम् पदमेकम्, एकं बृहदभियानं वयम् आरभामहे। अस्माकीनानि सीम - क्षेत्राणि सन्ति, अस्मदीयानि यानि सागर – तटीय - क्षेत्राणि सन्ति, तत्रत्याः प्रायेण त्रिसप्तत्युत्तरैकशतं जनपदा: सन्ति, ये नाम कस्यचन देशस्य सीम्ना सामुद्रिकतटेन च युक्ताः सन्ति । आगामिषु दिवसेसु 'NCC' - इति राष्ट्रिय – सैन्य – प्रशिशिक्षु – वृन्दस्य विस्तर: तेषां सीम - जनपदीयानां यूनां कृते विधास्यते । सीम - क्षेत्रीया: सैन्य - शिशिक्षवः... वयं प्रायः लक्षं नवीनान् 'NCC' इति सैन्य – प्रशिशिक्षून् सज्जीकरिष्यामः, किञ्च तेषु प्रतिशतं त्रयस्त्रिंशत् – मिताः अस्मदीयाः पुत्र्य: स्युः, अयमपि प्रयास: भविष्यति। सीम - क्षेत्रीयाणां प्रशिशिक्षूणां प्रशिक्षणं सैन्य - बलै: करिष्यते। समुद्र – तटीयाः ये सैन्य – प्रशिशिक्षवः सन्ति तान् नौ – सैनिकाः प्रशिक्षयिष्यन्ति किञ्च यत्र वैमानिकानि सैन्यास्थानकानि सन्ति, तत्रत्यानां प्रशिशिक्षूणां कृते वायु – सैन्य - पक्षतः प्रशिक्षणं प्रदास्यते। सीमानः तटीयक्षेत्राणि च आपदां साम्मुख्यं कर्तुम् एकां प्रशिक्षित – मानव – शक्तिम् प्राप्स्यन्ति, युवानः सशस्त्र – सेनासु वृत्तितां विनिर्मातुम् आवश्यकं कौशलम् अपि प्राप्स्यन्ति।

मम प्रिया: देशवासिनः, विगते वर्षे रक्तदुर्गात् मया उक्तम् आसीत्, विगतानि पञ्च - वर्षाणि आवश्यकतानां पूर्तये किञ्च आगामि – पञ्च - वर्षाणि आकाङ्क्षाणां पूर्तये सन्ति। विगतैकवर्षे एव देशेन बृहत्तराणां महत्व – पूर्णानां च निर्णयानां सोपानानि अधिरूढानि। गान्धिवर्यस्य सार्धैक - शततमीं जयन्तीम् उपलक्ष्य भारतस्य ग्रामाः स्वयं अनावृत - शौचात् विमुक्ताः अभूवन्।

आस्थाकारणेन प्रताडितेभ्यः शरणार्थिभ्यः नागरिकता – प्रदायकः विधिः, दलितेभ्यः, पश्चवर्तिभ्यः ... SC/ST/OBC – इत्यनुसूचित – जाति – अनुसूचित – जनजाति – अन्य- पश्चवर्ति – वर्गाणां कृते आरक्षणाधिकारस्य विनिर्माणस्य वृत्तं भवेत्, असम – त्रिपुरा – राज्ययोः ऐतिहासिकः शान्ति - सन्धि: स्यात्, स्थल - सेनानां सामूहिकीं शक्तिम् अत्यधिकं प्रभावपूर्णां विधातुं 'चीफ ऑफ डिफेंस स्टाफ' इत्यस्य नियुक्ति: भवेत्, करतारपुर – साहिब - वीथ्या: निर्धारित-समयावधौ निर्माणं स्यात्... देशेन इतिहास: विनिर्मितः, इतिहास – निर्माणं च दृष्टम्, असाधारण - कार्यं विधाय प्रदर्शितम् । दश – दिनेभ्यः पूर्वम् अयोध्यायां भगवतः श्रीरामस्य

भव्य - मन्दिरस्य निर्माणं प्रारब्धम् । श्रीराम - जन्म - भूमेः नैक – शताब्दप्राचीनस्य विषयस्य शान्ति - पूर्णं समाधानं जातम्। देशस्य नागरिकैः येन संयमेन विवेकेन च सह आचरितम्, व्यवहारः कृतः, तदभूत – पूर्वम् अस्ति किञ्च आयत्यामपि अस्माकं कृते प्रेरणादायकं वर्तते। शान्तिः, एकता, सद्भावना – एताः हि आत्म - निर्भरस्य भारतस्य शक्तित्वेन वर्तिष्यन्ते । इदं हि ऐक्यं, अयं हि सद्भाव: च भारतस्य उज्ज्वलस्य भविष्यस्य प्रत्याभूतिः वर्तते । एतेन सद्भावेन सह अस्माभिः अग्रे सरणीयम् । विकासस्य अस्मिन् महायज्ञे प्रत्येकं भारतीयेन स्वकीया काचिद् आहुतिः प्रदातव्या ।

अस्मिन् दशके भारतं नवीनया नीत्या नूतनया च रीत्या सहैव अग्रे सरिष्यति, अधुना साधारणत्वेन कार्यं नैव प्रचलिष्यति ... अधुना 'भवति' , 'चलति' इत्यस्य कालः व्यतीतः, वयं जगति अधुना कस्मादपि नैव अल्पतराः । वयं सर्वतः प्रथमं भवितुं प्रयतिष्यामहे । किञ्च एतदर्थमेव अस्माभिः सर्वश्रेष्ठम् उत्पादनं, सर्वश्रेष्ठं मानवीयं संसाधनम्, सर्वश्रेष्ठं प्रशासनम् ... प्रत्येकमपि वस्तुनि सर्वश्रेष्ठस्य लक्ष्यमधिकृत्य स्वाधीनतायाः पञ्च - सप्ततितमस्य वर्षस्य कृते अग्रे सरणीयम् । अस्मदीया नीतिः, अस्माकं प्रक्रिया, अस्माकीनाः उत्पादाः - सर्वमपि उत्तमोत्तमं भवेत्, उत्कृष्टं स्यात्, तदैव 'एकं भारतं - श्रेष्ठं भारतम्' - इत्यस्य परिकल्पना सार्थकीभविष्यति। अद्य अस्माकं कृते पुनः सङ्कल्प - स्वीकरणस्य आवश्यकता वर्तते, सङ्कल्पोऽयं स्वधीनतायाः कृते बलिदान - प्रदातॄणां स्वप्नानि पूरयितुं स्यात्, सङ्कल्पोऽयं त्रिंशदुत्तरैक – शत – कोटि - देशवासिनां कृते भवेत्, सङ्कल्पोऽयम् अस्माकं भावि - सन्ततीनां कृते स्यात्, तेषां समुज्ज्वलस्य भविष्यस्य कृते भवेत्, सङ्कल्पोऽयम् आत्म - निर्भरस्य भारतस्य कृते भवेत्। अस्माभिः नूनं शपथः अङ्गीकर्तव्यः, अस्माभिः प्रतिज्ञा करणीया, वयम् आयातं न्यूनातिन्यूनं विधातुं तद्-दिशि योगदानं करिष्यामः, वयं स्वकीयान् लघूद्योगान् क्षमीकरिष्यामः, वयं सर्वे 'vocal for local' इति स्थानीय – वस्तूनां कृते मुखरीभविष्यामः किञ्च वयम् अधिकाधिकं नवाचारान् करिष्यामः ... वयं क्षमीकरणं करिष्यामः - अस्माकं यूनः, महिलाः, आदिवासिन, दिव्याङ्गान्, दलितान्, निर्धनान्, ग्रामान्, पश्चवर्तिनः, प्रत्येकमपि क्षमीकरिष्यामः। अद्य भारतेन असाधारण - गत्या असम्भवं सम्भवीकृतम् । एतादृश्या इच्छाशक्त्या, एतादृशेन अवधानेन, एतादृशेन उत्साहेन च सह प्रत्येकमपि भारतीयेन अग्रेसरणीयम् । द्वाविंशत्युत्तर - द्वि - सहस्रतमं वर्षम्, अस्माकं स्वधीनतायाः पञ्च - सप्तति - तमस्य वर्षस्य पर्व अत्यन्तं निकटं वर्तते। वयम् एकेन सोपानेन एव दूरे स्थिताः। अस्माभिः नूनं निशा - दिनयोः एकीकरणं

करणीयम् । एकविंश - शताब्द्याः अयं तृतीय - दशकम् अस्माकं स्वप्न - पूर्णतायाः दशकं भवितव्यम् । कोरोना - संक्रमणं बृहती विपत्तिः वर्तते, परञ्च एतादृशी बृहती नैव, या हि आत्म - निर्भरस्य भारतस्य विजय - यात्राम् अवरोद्धुं प्रभवेत् । अहं द्रष्टुं पारयामि - एकस्य नवीनस्य प्रभातस्य रक्तिमाभाम्, एकस्य नूतनस्य आत्म - विश्वासस्य उदयम्, एकस्य अभिनवस्य आत्म - निर्भरस्य भारतस्य शङ्खनादम् । पुनरेकवारं भवद्भ्यः सर्वेभ्यः स्वाधीनता - दिवसस्य कोटि - कोटिशः शुभ - कामनाः । आयान्तु, मया साकं हस्तौ उत्थाप्य पूर्ण - बलेन घोषयन्तु - भारत - माता जयतु जयतु, भारत - माता जयतु जयतु, भारत - माता जयतु जयतु, वन्दे मातरम्, वन्दे मातरम्, वन्दे मातरम्, जयतु हिन्दः, जयतु हिन्दः।

*****

[भाषान्तरं – सर्वश्री-डॉ.श्रुतिकान्तपाण्डेय-सुनीलजोशिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

अणुप्रैषः - baldevanand.sagar@gmail.com

****